



PRACYAVANI SANSKRIT TEXTS
Vol. XXXXI

॥ भेनिस्-वणिजम् ॥



"VENICE-BANIJAM"

BY
DR. JATINDRA BIMAL CHAUDHURI

CALCUTTA. 1969.

Published By—Dr. Roma Chaudhuri
For
PRACYAVANI
(Institute of Oriental Learning)
3, Federation Street, Calcutta-9.

Available from the
PRACYAVANI
Address as above

SANSKRIT PUSTAK BHANDAR
38, Cornwallis Street, Calcutta-9.

DAS GUPTA & CO.
54/3, College Street, Calcutta-12.

CHOWKHAMBA SANSKRIT SERIES OFFICE
Banaras City.

MOTILAL BANARASI DAS
P. B. 75, Chowk, Banaras City
Or,
Jawaharnagar, New Dehli.

MUNSHIRAM MANOHARLAL
P B, 1165, Nai Sarak, Dehli-6.

Printed by—Dr. Roma Chaudhuri
3, Federation Street, Calcutta—9

Rexin : Rs. 10. only. Price Rs. 8 only.

Venice-Bāņijam

BLESSINGS

Bravo ! After going through this absolutely unique work "Venice-Banijam", one feels really crying out in delight : Bravo ! What an excellent idea and what a bold execution ! One could never imagine that Shakespeare could be so easily intelligible to all through the medium of Sanskrit, generally supposed to be so very difficult and uninteresting ! In fact, in many places, it is easier to understand even than the original, needing extensive annotations, notes, explanations etc. Really, a great need of the Sanskrit World, not caring for any other language besides the Deva-bhasa, has been removed now.

Our most beloved Dr. Jatindra Bimal holds, indeed, a unique position in the History of Modern Sanskrit Literature. On the one side a great Research Scholar of fame, having about 120 Research works to his credit ; and on the other, an equally great, or rather greater, original contributor, with 30 Modern Sanskrit Dramas and 2,000 Sanskrit songs to his credit ; a poet, a dramatist, a writer in Sanskrit of equal, or rather greater, fame—who can be compared with him ?

Also as a Karma-Yogin, he founded his well-known Research Institute "Pracyavani", having many useful branches. The Pracyavani has, thus, a Library Department, a Publication Department, a Research Department, a Catuspathi Department, a Propagation Department, a Sanskrit-Pali-Drama Department etc.

As a Karma-Yogi, again, he made excellent arrangements for staging these Sanskrit Dramas all over India

and also out side, for a decade continuously, on an average 50/60 times a year.

His beloved "Pracyavani-Natya-Sangha" had the unique honour of staging three Sanskrit Dramas in New Delhi Rastrapati Bhavan in the benign presence of revered Rastrapati Dr. Sarvapalli Radhakrishnan. The Sanskrit Dramas, thus staged were— "Amara-Miram" (composed by Dr. Jatindra Bimal) in April, 1963, "Bharata-Vivekam" (composed by Dr. Jatindra Bimal) in October, 1964, "Bharatacaryam" (on the holy life of Dr. Radhakrishnan, composed by Principal Dr. Roma Chaudhuri) in October, 1966. On the second occasion, he graciously donated Rs. 500/ to Pracyavani, as his blessings ; on the third, Rs. 1500/-.

Our most beloved Dr. Jatindra Bimal is no more. But although he left his mortal coils nearly three years ago, his immortal spirit lives and works through his learned wife Dr. Roma Chaudhuri, Principal, West Bengal Government Lady Brabourne College, Calcutta. Her burning enthusiasm, indefatigable energy, unfailing courage have made her a true "Sahadharmini" and by far the best "Uttara-Sadhaka" of her beloved husband.

May she live long and carry on the torch of her illustrious husband.

May 'Pracyavani' flourish and prove herself to be true to her name.

(Dr.) Satkari Mookerji, formerly,
Asutosh Professor and Head of the
Department of Sanskrit, Calcutta
University, and Director, Nalanda
Research Institute, Bihar.

15th February
1967,

"VENICE-BANIJAM"

"ONLY AN EARTHEN LAMP"

"Venice-Banijam" is, indeed, something very unique in the History of Modern Sanskrit Literature. It is a wonderful, Sanskrit version of Shakespeare's "Merchant of Venice" the first of its kind, composed on the occasion of Shakespeare's Fourth Birth Centenary in April, 1964.

It was first staged under the kind auspices of "Visvarupa", the well-known Dramatic Organisation of Calcutta, in its beautiful and spacious auditorium on 25th April, 1964, with great success. Then, it was once again staged on the 27th. April, 1964 under the kind auspices of "Shakespeare's Fourth Birth-Centenary Citizens Committee of Calcutta."

Both the performances were great successes and these new types of Sanskrit Dramas caught the imagination of all. That such a unique Sanskritized Shakespeare would be of immense benefit to the revered Pandits, all over India, was confidently and joyfully opined by all.

There was no time for him to print his beloved "Venice-Banijam", for on 10th July, 1964, he was taken away by his beloved Mother on Her benign lap.

Now, after nearly three years, that unique production first sees the light of the day, to the great joy of all.

And hapless and hopeless as I am, I light only an Earthen Lamp at his holy altar.

What more can I do ?

Pracyavani
3, Federation Street,
Calcutta-9
10th February
1967.

ROMA

भेनिस्-वणिजम्

डक्टर-श्रीयतीन्द्रविमल-चतुर्धुरीणेन विरचितम्

(नान्दी)

नमाम्यहं सेक्स्पियारं कविसार्वभौमं
विश्व-सौन्दर्य-माधुर्य-विकाशित-शोभम् ।
चारित्र-चित्रणविभुं भाषा-कुहककरं
चतुःशततम-जन्म-वर्षोत्सव-विमण्डितम् ॥१॥

(नान्द्यन्ते प्रविशति सूत्रधारः ।)

सूत्रधारः । शुभे वर्षेऽस्मिन् विश्वविश्रुत-महाकवि-सेक्स्पियार-महोदयस्य चतुःशततम-शुभ-जन्मोत्सवोऽनुष्ठीयते विश्ववासिभिस्तथा चास्माभिर्भारतवासिभिरित्यहो परम-मोदकारणमस्माकं सर्वेषाम् । तमुपलक्ष्य कलिकाता-नागरिक-सेक्स्पियार-जन्म-चतुःशततम-वर्षोत्सव-कर्तृपक्षैरादिष्टोऽस्मि—संस्कृत-भाषया रूपान्तरितं महाकवि-सेक्स्पियारविरचितं किञ्चन नाटकं नाट्यं प्रयोक्तव्यमिति ।

तद् वयं "प्राच्यवाणी" सदस्याः पश्चिमवङ्ग-सर्वकारीय—"संस्कृत-शिक्षापरिष"दध्यक्षेण डक्टर-श्रीयतीन्द्रविमल-चतुर्धुरीणेन "मार्चेण्ट अव् भेनिज्" समाख्य-महाकवि-सेक्स्पियार-विरचित-सुप्रसिद्ध-नाटकमवलम्ब्य सरल-संस्कृत-भाषया लिखितं "भेनिस्-वणिजं" नाम नाटकं प्रयोक्ष्यामहे ।

किन्तु कथं चिरायते मम सर्वकर्मनिपुणा नटी ? (नेपथ्याभिमुखमवलोक्य) देवि देवि ! यदि तव नेपथ्यकर्मावसितं तदत्र आगम्यताम् ।

नटी। (प्रविश्य) देव ! इयमहमागतास्मि। किन्तु आंग्ल भाषातः संस्कृतभाषया रूपान्तरितं नाटकं निखिले विश्वे वयमेव सर्वप्रथमम् अभिनेष्याम इति हेतोर्भीत-भीतास्मि।

सूत्रधारः। देवि ! किं तव भीतिकारणम् ? संस्कृतं नाम शाश्वतिकी सार्वजनीन-भाषा। महाकविः सेक्स्पियारोऽपि विश्ववन्द्य-शाश्वत-कविः। तस्य महाभावस्य स्फूर्तिविषये, विश्वभाषा–संस्कृत-माध्यमेन प्रयत्नोऽवश्यमेव विधेयः।

महाभाषा हि महाभावस्य महाप्राणेश्वरी। ततश्च श्यालिकापति-कुल-कोपकरोऽपि स्वस्रादि-वधूवन्धु-गोष्ठीप्रियः कार्त्तिक-सुन्दरो जामातृवर इव स महाभावो वहुसमादृतो भविष्यतीति ध्रुवम्।

नटी। (मृदु मधुरं हसन्ती) वरिष्ठ-जामातृमन्य ! तदात्मविषये चिन्ताकुलापि नाट्यविषये निश्चिन्तास्मि। इदानीं कथय देव ! अस्य नाटकस्य विषय–वैशिष्ट्यम्।

सूत्रधारः। मन्मते तद् द्विधा विभक्तव्यम्। तत्र प्रथमतः—न केवलं भाषाविशेष-निवद्धनाटके परं विश्वसाहित्येऽपि वन्धुत्वस्य माहात्म्यरूपायणं न दृश्यते, महाकविना तु तदत्र भूयसा दर्शितम्।

द्वितीयतः—नार्याः प्रत्युत्पन्न-मतिता विषयवुद्धिभूयिष्ठता चात्र वाहुल्येन वर्तते यच्चापि नान्यत्र दृष्टिपथमायाति।

सामग्रिक–दृष्ट्या पुनः—

असृजदिह कविर्यद् भव्य–भाषेन्द्रजालं
व्यरचयदपि चित्रं यच्च चारित्रचित्रम्।
रस–गुण–परिपाटी या त्वलङ्कारथोटी
सकलमपि कवेः किं कौशलं न व्यनक्ति ? ॥२॥

नटी। ततो देव ! वहुजन-सुखाय वहुजन-हिताय च नाटकमिदं सुष्ठु नाट्ये प्रयोक्ष्यामहे।

सूत्रधारः। देवि! पश्य पश्य ;—

बन्धुत्व-परमादर्शम् "व्यासानिओ"—समन्वितम्।
"एण्टोनिओ" इति ख्यातम् आत्मत्यागमहाव्रतम् ॥३॥

(इति प्रस्तावना)

प्रथम दृश्यम्

भेनिस्-राजपथः।

एण्टोनिओ। व्यासानिओ! मां ब्रूहि तस्या नाम यां त्वं संगोपनं द्रष्टुमिच्छसि, यस्या वृत्तं मह्यं वक्तुं त्वं प्रतिश्रुतवांश्च।

व्यासानिओ। तवैतद् नापरिज्ञातं कथमहं आदानातिरिक्तं व्ययं कृत्वा रिक्त-सर्वस्वो जात इति। एण्टोनिओ! तव सकाशे नाहं केवलम् अर्थविषये ऋणी परम् असाधारण-बन्धुत्वविषयेऽपि। विपुलर्ण-भारलाघवाय मया क उपायो निर्धारितः त्वद्बन्धुत्वाश्वासेन तद्विषयकं किञ्चिदद्य तुभ्यं विज्ञापयामि।

मत्तो निशम्य सदयं सदुपायमेनं
चित्ते निवेश्य विमृशास्य शुभाशुभत्वम्।
लोके न कञ्चन जनं त्वदृते विलोके
यो मे हितं समुपदेक्ष्यति बन्धुभावात् ॥ ४ ॥

एण्टोनिओ। सहृदय व्यासानिओ! तद्विषये मां ब्रूहि। यथा त्वं स्वयं सर्वदोष-रहितोऽसि उपायोऽपि कश्चन तथा भवेच्चेत् निश्चितं जानीहि—मम वित्तं मम सामर्थ्यं मम सर्वं त्वदर्थं समर्पितं स्यात्।

व्यासानिओ। शृणु! बेलमण्ट-नगरे अस्ति पैतृकवित्त-शालिनी काचन कुमारी अपूर्व-सौन्दर्यमहिममयी। ततोऽपि महा-

महिममयी सा मानस-गुणविभूषणैः। इतः पूर्वं परिदृष्टा सा स्वमनोऽभिलषितम् इङ्गितैर्मह्यं विज्ञापितवती। नाम्ना सा पोर्शियेति। क्याटोकन्या-ब्रुटासूपत्नी-"पोर्शिया"तो न सा कथञ्चन न्यूना। तस्या विद्यन्ते बहवः पाणिप्रार्थिनः। मम बन्धुवर! प्रतियोगियुवजनमध्ये यथार्हं स्थानं लभेय तदर्थं किञ्चिद् वित्तं मया लभ्येत चेत् मनो मे सूचयति—तामहम् अवश्यमेव प्राप्नुयाम्।

एण्टोनिओ। जानासि किल, यत्किञ्चिन्मे अर्थवित्तादिकं विद्यते तत् साम्प्रतं समग्रमेव समुद्रवक्षसि पोताश्रये वर्तते। साम्प्रतं रिक्तहस्तस्य मे मुद्रार्जन-क्षमता कापि नावशिष्टा। तथापि त्वं गच्छ, भेनिस्-नगरे यदास्ते मम यशः तदाश्रित्य कथञ्चन साहाय्यमाप्तुं समर्थो नूनं भविष्यसि। विश्वसिमि किल यत् व्यक्तिगतप्रभावेण वा आत्मविक्रयेण वा वेल्मण्टगमनार्थं प्रयोजनीयार्थसंग्रहविषये समर्थोऽहमवश्यं भविष्यामीति।

तस्माज् जहीहि मम मित्र! मनोऽवसादं
लक्ष्म्या सहैव करगां कुरु गेहलक्ष्मीम्।
कालाक्षमे कुशल-कर्मणि कर्तुमीष्टे
नोपाय-लाघव-गुरुत्व-गतास्ति चिन्ता ॥ ५ ॥

(निष्क्रान्तौ)

(इति प्रथम-दृश्यं समाप्तम्)

द्वितीय-दृश्यम्

[भेनिस्-नगरस्थ-साधारणजन-स्थानम्]

(प्रविशतः व्यासानिओ शाइलक् च ।)

शाइलक् । ड्याकेट् त्रिसहस्री ; त्रिसहस्री, हुँ ।

व्यासानिओ । महोदय ! वाढ़म्, मासत्रयाय ।

शाइलक् । मासत्रयाय, हुँ ।

व्यासानिओ । एण्टोनिओ प्रतिज्ञावद्धो भविष्यति ; इति मया पूर्वमेवोक्तम् ।

शाइलक् । एण्टोनिओ प्रतिज्ञावद्धो भविष्यति—सत्यम् ।

व्यासानिओ । अपि भवान् ममानन्दं संजनयिष्यति, मम सहायको भविष्यति, मां सुखिनं करिष्यति ? भवन्तं प्रत्युत्तरं याचे ।

शाइलक् । ड्याकेट्–त्रिसहस्री—मासत्रयाय – एण्टोनिओ-समयानुसारेण—सत्यम् ।

व्यासानिओ । अधुना किं भवतः प्रत्युत्तरम् ?

शाइलक् । एण्टोनिओ सज्जनः ।

व्यासानिओ । तस्य सज्जनताविषये भिन्नमतम् अपि भवता श्रुतम् ?

आ हालिकाद् धूलिविलिप्तपादाज्
जानन्ति सर्वे चरितं तदीयम् ।
भवानपीमं न हि वेत्ति नार्थं
निद्राच्छलं जागरितस्य किं ते ? ॥ ६ ॥

शाइलक् । नहि, नहि, नहि । मत्कथित-सज्जन इत्यस्यार्थः —असौ वित्तवान् इति । किन्तु पोतश्रेणी काष्ठखण्डानि, नाविका अपि मनुष्याः केवलम् । तदुपरि विद्यन्ते स्थलेन्दुरा जलेन्दुराश्च— अर्थात् ये स्थल-जल-दस्युनाम्ना अभिहितास्तेऽपि वित्तापहारिणः । ततोऽधिकानि जलाचल-झञ्झा-दौरात्म्यादीनि । तथापि एण्टोनिओ

प्रचुर वित्तसम्पन्न एव । ड्याकेट-त्रिसहस्री—मन्ये तस्य प्रतिज्ञापत्रं मयो ग्रहणीयम् ।

व्यासानिओ । निश्चिन्तेन भवता तेन स्वाक्षरितं पत्रं ग्रहणीयं ध्रुवम् ।

शाइलक् । निश्चितम्, निश्चिन्तोऽहम्. अवश्यमेव भविष्यामि, तस्योपायमपि चिन्तयिष्यामि । (स्वगतम्)

हस्ते ममासि पतितोऽद्य यहूदिशत्रो !
कामं कठोर-शपथेन ऋणं ददे ते ।
मज्जाति-वैरिहननाय कृतोद्यमं मां
त्वामाश्रितं सततमादिपित ! क्षमस्व ॥ ७ ॥

अपि एण्टोनिओ इत्यनेन सह वार्तालापसुयोगो मे मिलिष्यति ?

व्यासानिओ । निश्चितम्, यदि भवान् अस्माभिः साकं भोक्तुं स्वीकुर्यात् ।

शाइलक् । अये ! शूकर-मांसघ्राणग्रहणाय ? भवतां नज़रेथ्-शिशुर्यान् सर्वान् मन्त्रबलेन पिशाचाधाररूपेण परिगणितवान्—तान् भोक्तुम् ?

भवद्भिः सह क्रय-विक्रयौ मे चलिष्यतः गमनागमने च, तथा च संलापः—किन्तु भवद्भिः सह पानाहारोपासनानि नाहं स्वीकरोमि । (नेपथ्याभिमुखः) अरे अद्य "वियालटो" संवादः कः ? अस्यां दिशि कः समायाति ?

(प्रविशति एण्टोनिओ महोदयः)

व्यासानिओ । एष एण्टोनिओमहोदयः समायातः ।

शाइलक् । (स्वगतम्) अहो ! चाटुक्रियापरायणो धनिजन-नियुक्त इवासौ लक्ष्यते । असौ ख्रीष्टधर्मावलम्बीति हेतोरस्मिन् ममान्तरिको विद्वेषः । ममाभ्यधिकासूयाकारणमेतत् यदेष निर्बोध इव विना शुल्कम् ऋणं दत्त्वा अस्माकं शुल्कं भेनिस्-नगरस्य

सर्वत्र न्यूनीचकार। यदि सुयोगो मिलेत् बहुदिवस-पोषितस्य विद्वेषस्य सार्थक्यमवश्यमेव लभेय।

मम पवित्रेहूदिजातौ एवास्य द्वेषः। वणिजां सम्मेलनस्थल एव दण्डायमानोऽसौ मां मम वृद्धिजीवित्वं मम सत्पथार्जित-लाभञ्च निन्दति, मम न्यायार्जित-वित्तं वृद्धिनाम्ना अभिधत्ते च। यद्यहं कदाप्येनं क्षमेय तदा मम समग्रा यहूदि-जातिरेव भवेदभिशप्ता।

व्यासानिओ। अये शाइलक्! अपि भवता किमपि श्रूयते?

शाइलक्। औदार्यमहं दर्शयिष्यामि। एण्टोनिओ महोदय! भवान् मया सार्धं लिपिजीवि-सकाशे चलतु। तत्र भवता स्वाक्षर-संवलितं प्रतिज्ञापत्रमेकं निर्मातव्यम्। केवलं कौतुकच्छलेन तत्रेत्थं लिखितं स्यात् – यदि भवान् अमुष्मिन् दिवसे अमुष्मिन् स्थले ऋणशोधनासमर्थो भवेत् तदा शास्तिरूपेण तव सौम्य-कोमल-देहस्य यथेच्छं कुतश्चन स्थानान्मया "पाउण्ड' मितं मांसं ग्रहणीयं भवेत्।

एण्टोनिओ। अथ किम्। अहं स्वीकरोमि। प्रतिज्ञापत्रमिदं स्वाक्षरीकृत्य अहं सर्वेभ्यो भवत्कृपाविषये वदिष्यामि।

व्यासानिओ। नहि, नहि, एतादृशे प्रतिज्ञापत्रे कदापि भवता स्वाक्षरं न देयम्। चिरायाभावग्रस्तोऽहं भवेयम् इत्यपि वरम्।

एण्टोनिओ। अये! भयं किम्? मम मांसं कदापि नानेन प्राप्तव्यं भविष्यति। मासद्वयाभ्यन्तरे अर्थात् प्रतिज्ञापत्र–निर्धारित-समयस्य मासात् प्रागेव त्रिसहस्र-ड्यकेटमुद्राणां नव-गुण-मुद्रा मया लप्स्यन्ते इति ध्रुवम्।

शाइलक्। अये आदिपितः आब्राहाम! कीदृशा एते ख्रीष्ट-धर्मावलम्बिनः? स्वयं निष्ठुरा एते अन्यान् सर्वानपि निष्ठुरान् कल्पयन्ति। वदतु भवान्, यद्येष प्रतिज्ञापत्रानुसारं न भवति समर्थं ऋणपरिशोधे किं मयैतस्य मांसेन करणीयम्? मानवदेह-कृत्तं

'पाउण्ड' मितं मांसं मूल्यहीनम्। गोच्छागलमांसवन्न तद् विक्रेतव्यं स्यात्। अस्य सदिच्छालाभाय वन्धुवत् प्रस्तावमिममहं कृतवान्। यदि प्रस्तावोऽयम् अनेन गृह्येत तद्वरम्, अन्यथाहं स्वच्छन्दं स्थानान्तरं यामि। (प्रकाशम्) तथापि शपथ आस्ताम्। अमूलक-सन्देहवशं गतौ भवन्तौ मां प्रति प्रतिकूल-विचारं मा कुरुताम्।

एण्टोनिओ। शाइलक्! प्रतिज्ञापत्रमिदम् अहं स्वाक्षरी-करिष्ये।

शाइलक्। ततो लिपिकारगृहे अविलम्बं मया साक्षात्कारः करणीयः। तत्र भवता तस्मै प्रतिज्ञापत्र-लेखनविषये निर्देशो देयः। गृहे गत्वा ड्यकेट्-मुद्राभिः स्थालीं पूरयित्वाहं तत्र यामि। गृहं मम अमितव्ययिनः कस्यचन हस्ते न्यस्तमास्ते। तस्य पर्यवेक्षणं कृत्वाहं भवत्साक्षात्कारं लिपिकारगृहे लप्स्ये।

एण्टोनिओ। अथ किम्, भवान् त्वरितं गच्छतु।

(शाइलक् निष्क्रान्तः)

यहूदिवरस्यास्य दया परिलक्ष्यते, स ख्रीष्टधर्मावलम्बी भविष्यति।

व्यासानिओ। किन्त्वहं पयोमुख-विषकुम्भं जनं नाद्रिये।

अस्यां सखे प्राणपण–प्रतिश्रुतौ
वद्धं भवन्तं ध्रुवमस्मि लज्जितः।
क्षेमं विधाता विदधातु तेऽन्यथा
लोके भविष्यामि चिराय धिक्कृतः ॥८॥

एण्टोनिओ। नास्त्यत्र भावनाविषयः। मम पोतश्रेणी निर्दिष्ट-दिवसस्य मासात् प्रागेव पोताश्रयं समागमिष्यति।

(उभौ प्रस्थितौ)

(द्वितीय-दृश्यं समाप्तम्)

तृतीय-दृश्यम्

(प्रविशन्ति व्यासानिओ, पोर्शिया, अर्यासियानो नेरिसा अनुचरश्च ।)

पोर्शिया । (व्यासानिओ) महोदय ! धन्यास्मि भवदागमनेन । भवान् पश्यतु—अदूरे पेटिकात्रयं सज्जितमास्ते । तासु एकस्याः पेटिकाया अभ्यन्तरे राजते मम (प्रति) मूर्तिः । यो जनः पेटिकान्तःस्थां मूर्तिं प्राप्नुयात् स मूर्तिमतीं मां लभेत, तेन सहाचिरात् ममोद्वाहकार्यं संपत्स्यते । निष्फलप्रयत्नो जनः अचिरादेव स्थानान्तरितो भवेत् ।

ततो ममायमनुरोधः—पेटिकानिर्वाचनात् प्राक् कियांश्चन कालो भवताऽत्र नेयः, यतो भवति निर्वाचने पराजिते सति मया अचिरादेव भवतः सङ्गः परित्यक्तव्यः । ततो भवतोऽत्र कियत्कालं यापनं प्रार्थ्यते ।

मम मनः पुनः सूचयति—नाहं भवद्विरहिणी भविष्यामीति । न भवतु नामैतत् प्रेमप्रचोदितं वचः, परं नैतद् विद्वेषभाषितमपि—तदपि भवता बुध्यते किल । यदि भवान् मन्मनोभाव-परिग्रहणे समर्थो न भवेत्—किमहं कुर्याम् ? भावनासंवला कुमारी न वाक्प्रधाना । तथापि प्रार्थये, मह्यं सङ्गदानार्थमेव भवानत्र मासमेकं द्वयं वा तिष्ठतु ।

तत् प्रार्थये सविनयं ननु मासयुग्मं
मासोऽथवाऽत्र भवता कृपयाऽपनेयः ।
दैवाद् भवेयमपि चेद् भवता वियुक्ता
स्थेयात् पुनर्मधुमयी स्मृतिरन्तरे मे ॥ ६ ॥

व्यासानिओ । नहि देवि ! अचिर-निर्वाचनायैव मां प्रचालयतु भवती । यतोऽनिर्दिष्ट-भविष्यत्कालोऽहं पीडन-यन्त्र-जनितां वेदनामनुभवामि । स्वीकरोमि सत्यं प्रणय-व्याकुलोऽहं वर्ते, ततः

कालविलम्बं न सहे। प्रकृत-पेटिका-निर्वाचनविषये मम भाग्य-परीक्षणमचिराद् भवतु।

(पेटिकानां पुरोवर्तिनी यवनिका अपसृता।)

पोर्शिया। ततो भवान् अग्रेसरीभवतु। एतासां सुवर्ण-रौप्य-सीसक-पेटिकानाम् एकस्या अभ्यन्तरे मम मूर्तिर्विराजते। यदि भवान् सत्यं मम प्रणय-व्याकुलो वर्तते, निश्चितं मम मूर्तिर्भवतः करस्पर्शं लभेत। नेरिसे! त्वमन्ये च सर्वे दूर-मपसरत। यावत्कालपर्यन्तं व्यासानिओ महोदयो निर्वाचन-कर्मव्यापृतो वर्तते तावत्कालपर्यन्तं सङ्गीत-सहयोगेन वाद्यं प्रसरतु।

(स्वगतम्) अये मम हारकियोलिस्! प्राग्रेसरीभवतु भवान्। भवति जीवति जीविष्याम्यहमपि। अदृष्टेन सह समरेऽस्मिन् स्वयं योद्धा भवान् यथा भयं भजते, दर्शकस्थानमास्थाप्यहं ततोऽभ्यधिक-भीतिं भजामि।

[विवेचनरते व्यासानिओ-महोदये सह वाद्येन सङ्गीतं गृहं मुखरयति।]

(संगीतम्)

ब्रूहि प्रेम्णो जन्म कुत्र
हृदये शिरसि अथवाऽन्यत्र।
कथं वा जायते कथं वा वर्धते
ब्रूहि मां ब्रूहि अयि विचित्र।
सृष्टिः प्रेम्णो नयनपाते
वृद्धिः प्रेम्णो नयनाघाते।
जन्मसमये मरण आयाते
घण्टा ध्वनतु अहो सर्वत्र॥

ढं ढं ढं ढं ढं ढं
घण्टा ध्वनतु अहो सर्वत्र ॥

व्यासानिओ। बहिर्दर्शनं वस्तूनां प्रायशः अन्तरवस्थाविरोधि।

"यत्राकृतिस्तत्र गुणा" इतीयं
वाणी बहुत्रैव मृषा विभाति।
प्रतारिता हन्त भवन्ति नित्यं
जना बहिर्भूषण-चाकचक्यात् ॥१०॥

तस्मादये प्रोज्ज्वल-सुवर्ण ! सम्राजो मिडासः कठोर-खाद्य !! नाहं त्वाम् अभिलषामि। मानवसाधारण-विनिमय-कार्यव्यवहार्यं साधारण धातवपदार्थ (रौप्य)! त्वया च मे न किञ्चन प्रयोजनम्। अयि क्षुद्र तुच्छ-सीसक ! यद्यपि त्वं शुभोत्पादन-विनिमयेन भयदर्शन-तत्परम् इव दृश्यसे तथापि तव सरल व्यक्त-वचो माम् अन्ययो-र्द्वयोर्वाक्पटुत्वे हतादरं करोति। अतस्त्वामेवाहं वृणे, आशासे परिणामोऽस्य सुखाय भविष्यति।

पोर्शिया। अये प्रेम ! धैर्यमवलम्बस्व. तवोन्मत्तोल्लासं कुरु नियतम्। विधेहि संयमेन आनन्दधारावर्षणम्। लघूकुरु भावाति-शय्यम्। तवाशीर्वादानहं बाहुल्येन प्राप्नोमि ; आशातिरिक्तम् एतत् सर्वं ततश्च भीतास्मि।

ब्यासानिओ। किमत्र मया द्रक्ष्यते ? (सीसक-पेटिकाम् उन्मोच्य) सौन्दर्यमण्डितायाः पोर्शियायाः प्रतिमूर्तिरत्र दृश्यते। अलौकिक-क्षमताधरः शिल्पी कश्चन मूर्तिमेतां सजीवामिव कृतवान्।

अहो ! दृश्यतेऽत्र किञ्चन कागजखण्डं यन्मम सौभाग्यं संप्रकटयति। अत्र लिखितमास्ते—

न त्वया विचारः कृतो बाह्यरूपश्रितः।
भवतु ते भाग्योदयः सततात्महितः ॥

ईदृशं सौभाग्यं तव सकृत् संघटितम् ।
सुखं विराज, कामयस्व न तु नवार्जितम् ॥
यदि सुखं तव जातम् अन्तरनुभूतम् ।
भाग्यमेतन्मन्यस्व चिरानन्द-सूतम् ॥
स्वकीय-प्रेयसीं प्रति धाव धाव द्रुतम् ।
सादरं वृणुष्व प्रियां सर्वोल्लास-पूतम् ॥

अये ! मधुमयो वचनविन्यासः । (पोर्शियामुद्दिश्य) सौन्दर्य-खने ! त्वदनुमतिक्रमेण ग्रहीतुं दातुमयमहं समागतोऽस्मि । अये सौन्दर्यसार महिमविभूषणे ! सन्देहव्याकुलचित्तोऽहं दण्डायमानोऽस्मि त्वत् स्वाक्षर-सम्मति-प्रसादन-विनोदनार्थम् ।

पोर्शिया । नाथ ! पश्यसि किल सर्वथा अयोग्या अहमत्र दण्डायमाना तिष्ठामि । आत्मनो विषयं विभाव्य नाहं कदाचन दुराकाङ्क्षामिमां पोषयामि यदहं बाहुल्येनोत्तमतरा भूयासम् । किन्तु तव पत्नीरूपेण त्वया सह राजन्त्या मे गुणाः षष्टिगुणिता भवन्तु, सौन्दर्यं सहस्रगुणं वर्धताम् धनं दशसहस्रगुणं जायतामिति सुतरां प्रार्थये केवलं तव दृष्टौ समुन्नता भवितुं—वाञ्छामि किलाहं रूप-गुण-धन-जन-बल विषयेष्वसामान्यताम् आसादयितुम् ।

साम्प्रतमहं स्थिरमकिञ्चना. शिक्षा-दीक्षा-ज्ञानविहीना एका नगण्या बालिका ; किन्तु सुखं ममात्र यत् शिक्षाया वयो मे न गतम्, ततोऽधिकं सुखं मे यत् सत्यमहं चिन्तयामि—नाहं तादृशी मूर्खा यच्छिक्षणेनापि ममोन्नतिर्न भवितेति । नाथ मम सर्वाधिकं सुखमिदमेव यन्मम शान्तः स्वभावः मम जीवनस्य प्रभु-नियन्तृ-राजसकाशे आत्मानं पूर्णतया समर्प्य तस्यैव निर्देशानुसारं प्रचरितुं वाञ्छतितमाम् ।

अद्य प्रभृति यद् यत् ममास्ते तत् सर्वं तवैव संवृत्तम् । मुहूर्तात् प्रागहमधीश्वरी आसम् सुशोभन-प्रासादस्य दासदासीनाञ्च,

फलतो मम जीवनस्य सर्वमयी कर्त्री आसमहमेव ; किन्तु अयि मम हृदयसर्वस्व ! अचिरादेतत् सर्वं—पोर्शियापर्यन्तं सर्वात्मकं सर्वं तवैव जातम्। अङ्गुरीयेणैतेन सह सर्वं मम तुभ्यं ददे। यदि कदाचिदपि अङ्गुरीयकमेतत् तव अङ्गुल्याः स्खलितं भवेत्, कथञ्चन लोपमायादन्यस्मै दत्तं भवेद्वा तदाहं ज्ञास्यामि किल—नाहं ततः परं तव प्रेमभाजनमिति। तादृश-दुर्घटनायां जातायां सुयोगो मे मिलिष्यति त्वां प्रति वैरूप्यपोषणाय।

व्यासानिओ। देवि ! त्वं मम भाषणशक्तिं पूर्णतया हृतवती। धमन्यां मम प्रवहति यदुष्णं रक्तस्रोतः तस्य नीरव-भाषां विना नास्ति अन्या काचन भाषा साम्प्रतम्। जनप्रिये राजनि कस्मिंश्चिच्चित्ता-भिलषितं भाषमाणे यथा प्रजानां मनोऽवस्था उत्कटोच्छृङ्खल-भाषाविह्वल-वाक्यहीनवाक्स्फूर्तिस्थलाभिव्यक्ति-विशिष्टा, तादृशी समाप्यद्य संवृत्ता। सत्यं न्वेतद् यदैतदङ्गुरीयकम् अङ्गुल्या भ्रष्टं भवेत् ततः प्रागेव मम जीवनवायुर्देहान्निर्गमिष्यति। पोर्शिये, तदा स्वच्छन्दं त्वं वक्तुमर्हसि : व्यासानिओ मृत इति।

[प्रविशतो ग्रथासियानो नेरिसा च]

नेरिसा। मम प्रिय प्रभो ! प्रभुपत्नि च ? एतावत्कालमत्र स्थित्या जानामि किल यदस्माकम् अभीष्टं सिद्धमिति, ततः कालो-ऽयमस्माकम् अभिनन्दन-विज्ञापनाय। प्रभु-युगल ! भवद्भ्या-मस्माकमान्तरिकाभिनन्दनं विज्ञापयामि।

ग्रथासियानो। माननीय व्यासानिओ ! माननीये देवि च ! भवतोः कृते यादृशमानन्दं भवन्तौ काङ्क्षतः तादृशमेवानन्दं भवदर्थमहं प्रार्थये। भवत्सकाशे मदीयेयं प्रार्थना यदा भवन्तौ स्वप्रेम विवाह-बन्धनेन सुस्थिरं करिष्यतः ममापि उद्वाहक्रिया तदैव सम्पद्यताम् इति।

व्यासानिओ। सेयमनुमतिः सानन्दं दीयते। किन्तु विवाहार्थं कस्याश्चन कन्यायाः प्रयोजनमस्ति नास्ति वा ?

ग्र्यासियानो। प्रभुमहोदयं कृतज्ञतया विज्ञापयामि—प्रभुः स्वयमेव मनोमत-पात्रीं मह्यं दत्तवान्। ममापि चतुर्भवच्चक्षुरिव सर्वं त्वरितं द्रष्टुं समर्थम्। यदास्माकं कर्त्री भवता मनोनीता तदाहमपि तस्याः परिचारिकां प्रति मनो दत्तवान्। प्रेमनिमग्नस्य भवतः समकालमेव अहमपि प्रेमसागरे निमग्न आसम्। यत एषु विषयेषु यथा भवतस्तथा ममापि विलम्बोऽसह्यः। यथा भवतो भाग्यं पेटिकानिर्भरशीलमासीत् तथा ममापि। यतः एतां प्रति प्रेम-निवेदन-जनित-दारुण-परिश्रमेण यदाहं घर्माक्त-कलेवरोऽभवं प्रेमशतनिवेदनेन तालु मम शुष्कतामवाप्तम्. तदा इयमपि प्रभुप्रिया परिचारिका मां समाश्वासयत्—पेटिकानिर्भरशीले भवतोर्भाग्ये अनुकूले जाते ममापि भाग्यं ध्रुवं सुप्रसन्नं भविष्यतीति। नाहं जाने साम्प्रतं तस्यास्तद् वचः सत्यत्वेनात्मप्रकाशं करिष्यति न वा।

पोर्शिया। अये नेरिसे! अप्येतत् सत्यम्?

नेरिसा। देवि! भवत्या अनुमतिं लभेय चेत् सर्वं सत्यम्।

व्यासानिओ। अप्येतत् सर्वमान्तरिकं ते?

ग्र्यासियानो। निश्चितम्।

व्यासानिओ। ततो ध्रुवमावयोर्विवाहानन्दो युवयोर्विवाहानन्देन साकं वृद्धिं यास्यति किल।

ग्र्यासियानो। कोऽपि आयातीव। मम भेनिस्नगरीस्थ-प्राचीन-बन्धुः स्यालारिओ।

स्यालारिओ। एण्टोनिओ महोदयः पत्रेणानेन भवन्तमभिनन्दनं विज्ञापयति।

व्यासानिओ। पत्रावरणोन्मोचनात् प्रागेव ज्ञातुमिच्छामि मम बन्धोः स्वस्थताम्।

स्यालारिओ। तस्यास्वस्थता मानस्येव। स्वस्थतापि तथा मनसि। तस्य पत्रात् सर्वं ज्ञातं भविष्यति।

(व्यासानिओ पत्रावरणमुन्मोच्य पत्रं निरीक्षते)

पोर्शिया। पत्रमिदं व्यासानिओ-महोदयस्य गण्डदेशात् समस्तं शोणितं हृत्वा तं पांशुवर्णं करोति। अहो! एतेन दुःसंवादः कश्चन समानीतः। अपि कश्चन प्रिय वन्धुर्मृत्युकवलीभूतः? अन्यथा एतादृशस्य दृढ़मनस्कस्य पुरुषस्य वैवर्ण्यं न परिलक्ष्येत। अहो! कथमेतस्य पांशुवर्णता मुखस्य वृद्धिं भजते?

व्यासानिओ! विघ्नितो मया मा रोषमवाप्नुहि। अर्धाङ्गिन्या मम सर्वविषयेषु—सुखेषु दुःखेषु च अर्धं प्राप्तव्यमेव। ततो दुःसंवादस्यार्धमपि मयाऽवश्यमेव ग्रहणीयम्।

व्यासानिओ। मधुमयि पोर्शिये! यथाशक्य व्यथाराशिः पत्रमिदं कालुष्यपूरितं करोति। इतः पूर्वमेव त्वत्सकाशे मया प्रोक्तं यदहं निष्किञ्चन आसम्। वस्तुतो दारिद्र्यं मे ततोऽपि निम्नाभिमुखि। कस्यचन वन्धोः सकाशादहम् ऋणं गृहीतवान्। स्वार्थपर-वशोऽहं हितसाधकं तं वन्धुं दुश्छेद्य-प्रतिज्ञावद्धं कृतवान्।

देवि! यदिदं पत्रं पुरतस्तव दृश्यते, तन्न पत्रम्, वन्धोर्देह एव। अत्र लिखितम् अक्षरं तस्य देहस्य क्षतरूपं प्रतिभाति। तैः क्षतमुखैः प्राणानामुत्सरूपं शोणितं वहिर्निःसरतीव मन्ये। किन्तु स्यालारिओ! अप्येतत् सत्यम्। वाणिज्यविषये ये ये प्रयत्ना एण्टोनिओ-महोदयेन कृताः ते सर्वे एव व्यर्था जाताः? एकोऽपि न सफलीभूतः? त्रिपोलि मेक्सिको-इंलण्ड-लिस्वन् भारतवर्ष-देशेभ्यः कुतश्चनापि न सुसंवादः प्राप्तः? ये जलनिमज्जिताचलाः पोतानां शत्रवः तेषां सम्पर्कात् नैकोऽपि वाष्पीय-पोतो मुक्तिमलभत?

स्यालारिओ। नहि महोदय! नैकोऽपि। पुनः साम्प्रतं विज्ञायते; यदि एण्टोनिओ—महोदयस्य प्रभूतमपि वित्तमभविष्यत्, तथापि यहूदीवरस्तन्नाग्रहीष्यदिति।

एतदप्यचिन्तितपूर्वमेव यत् मानवदेहधारी कोऽपि मानवस्यान्यस्य

ध्वंसं साधयितुमीदृश-दृढ़प्रतिज्ञोऽधीरश्च भवितुमर्हतीति। सर्वदा स डिउक्-महोदयं करोत्युत्तेजितम्।

घोषयति च, यदि तस्य न्याय्यप्राप्यं एण्टोनिओ-मांसखण्डं स न प्राप्नोति, सोऽवश्यमेव अभियोक्ष्यते-यद् भेनिस्-नगरे राष्ट्र-स्वाधीनता क्षुण्णा खर्वीकृता च जातेति। विंशतिर्वणिजः भेनिस्-नगर्याः सर्वोच्चपदाधिष्ठिताः। स्वयं डिउक्-महोदयोऽपि तेन तर्क-वितर्कान् बहून् कृतवान् किन्तु प्रतिज्ञापत्रोद्दिष्ट-विद्वेषप्रसूत-विषयावाप्तिमूलक-न्यायविचार-प्रार्थनातः तं हतप्रयत्नं कर्तुं न समर्थो जातः।

पोर्शिया। (व्यासानिओमुद्दिश्य) अपीदृश-विपज्जालपरिवृतस्तव परम-बन्धुः?

व्यासानिओ। वाढ़म्। असौ मम प्राणप्रियो बन्धुः। तेन सदृशो हृदयवान् महान् परोपकारी जनो नान्यः कश्चनापि मया दृष्टः। अद्य समग्रे इटालीदेशे ये खलु जीवितास्तेषां मध्ये केवलमेकस्मिन् तस्मिन्नेव प्राचीन-रोमकजाति-सुलभ-मर्यादाबोधः सुपरिस्फुटः।

किञ्च,

न केवलं मे परमः स बन्धु-
विपच्च सा तस्य हि मन्निमित्ता।
कर्तव्यभारो द्विविधस्ततो माम्
अज्ञात-निस्तारपथं पिनष्टि ॥ ११ ॥

पोर्शिया। यहूदिमहोदयात् कति मुद्रास्तत्रभवान् धारयति?

व्यासानिओ। मदर्थं "ड्याकेट्" त्रिसहस्रीम्!

पोर्शिया। अये! केवलं तन्मात्रम्? अधुनैव तस्मै ड्याकेट्-षट्-सहस्रीं प्रदाय प्रतिज्ञापत्रं तद्विनाशय। सति प्रयोजने द्वादश-सहस्री अष्टादशसहस्री वा तस्मै देया। तथापि, मा नाम मम प्राणप्रिय-व्यासानिओनिमित्तात् ईदृश-बन्धुवरस्य केशाग्रमपि विपद्यताम।

व्यासानिओ ! प्राथम्येन मया सह धर्ममन्दिरमेहि, तत्र मां धर्मपत्नीरूपेण गृहीत्वा सत्वरं भेनिस् नगरीं गच्छ। अस्थिरचित्तेन त्वया पोर्शियापार्श्वे न स्थातव्यम्। तुच्छस्य तस्य ऋणस्य विंशति-गुणितमर्थं सहैव नय। ऋण-परिशोधानन्तरं तेन यथार्थ-बन्धुवरेण सहैवात्र पुनरागच्छ। विरहिण्यौ आवाम् अहं नेरिसा च कष्टेन दिनं यापयिष्यावः। तथापि साम्प्रतं विलम्बो न विधेयः। विवाह-दिवसे त्वया प्रस्थानं कर्तव्यम्। बन्धून् सर्वांस्ते स्वागत-सम्भाषणानि विज्ञापय, मनस्ते प्रफुल्लं राजताम्, मा चिन्तान्वितो भव। बहुमूल्य-लब्धस्य तव प्रेमामूल्यम्। किन्तु प्राथम्येन मया तव बन्धोः पत्रं श्रोतव्यम्।

व्यासानिओ। (पत्रं पठति) "मधुमय व्यासानिओ ! मम पोतश्रेणी इतस्ततो विक्षिप्ता विलुप्ता वा; ऋणदातारः सर्वे मां निष्ठुरं पीडयन्ति। ममावस्था जाता शोच्या। पुनः यहूदि-जनाय दत्तस्य प्रतिज्ञापत्रस्य समयोऽपि समुत्तीर्णः। जानामि, यहूदि-जनस्य ऋणशोधार्थं मम जीवननाशोऽनिवार्य एव। ततो मरणसमये त्वया सह मेलनं वारमेकं कामये—यथा आवयोरादान-प्रदानादिकं सर्वं सुविहितं स्यात्। तथापि त्वया सर्वं स्वमत्या विधातव्यम्। मदीय-बन्धुत्व-हेतोर्यदि तवात्रागमनं न सम्भवेत्, तर्हि केवलं मम पत्राह्वान-हेतोर्नागच्छेः"।

पोर्शिया। सर्वकर्माणि समाप्याचिरेण प्रतिष्ठस्व।

व्यासानिओ। प्रिये ! तव स्वच्छन्दानुमतिर्यदा मया लब्धा तन्निश्चितमहमधुनैव यास्यामि। बहिर्गमनसमये ब्रवीमि—न मया क्षणमित-समयोऽपि इष्टतम-कारणं विना क्षेपणीयः, विश्राम-प्रलोभनं न मां क्षणमपि दूरे स्थापयितुं शक्ष्यति।

(तृतीय-दृश्यं समाप्तम्)

———

चतुर्थ-दृश्यम्

भेनिस्नगरी-विचारालयः

(प्रविशन्ति महामहिम-डिउक् एण्टोनिओ, ब्यासानिओ, ग्र्यासियानो, स्यालारिओ अन्ये च ।)

डिउक्। किम् ? अपि एण्टोनिओ अत्रोपस्थितः ?

एण्टोनिओ । उपस्थितोऽस्मि भवत्प्रसादात् ।

डिउक् । दुःखितोऽहम् । निर्मम-हृदयहीनस्य दयालेश-रहितस्य प्रस्तरहृदय-शत्रोः स्वार्थपूरणाय भवानागतोऽस्ति ?

एण्टोनिओ । श्रुतं मया यत् तस्य कठोरपथं कोमलीकर्तुं भवता महान् यत्नः कृतः । किन्तु यतोऽसौ राजते स्वमतदृढः, विधानबलाच्चास्य रोष-कवलान्नाहमात्मानं परित्रातुं समर्थश्च, तत् सर्वथा पूर्ण-तितिक्षया शमप्रभावादपि सहिष्ये तस्य रोषोद्गिरणं दौरात्म्य-कोपप्रकटनञ्च ।

डिउक् । कोऽपि वहिर्गत्वा यहूदिमत्र समाह्वयतु ।

सालान् । असौ द्वारे एव सुसज्जो वर्तते । अयमायात्यसौ महानुभावः ।

डिउक् । तस्मै मार्गं देहि, स मम पुरतस्तिष्ठतु । शाइलक् ! सर्वेषां धारणा, तथा ममापि यद् नूनं भवान् प्रतिहिंसामूलकं कृत्रिम-रोषं प्रकटयति । तत्त्वतस्तु सर्वपश्चात् शुभात्मकं कर्म विधास्यतीति ।

अहो ! भवत आपात-निष्ठुर-कर्मतः सद्यः प्रकटिता दया सहानुभूतिश्च भविष्यति सर्वेषां चरम-विस्मयावहा । यथा भवान् साम्प्रतं सोरस्ताडं घोषयति—स्वाक्षरित-शास्तिविधानाय, तदानीं स एव भवान् न केवलं शास्तिविधान-पराङ्मुखो भविष्यति—

परं मौलिक-ऋणस्यार्धमपि न ग्रहीष्यति। यतो वणिग्राट् एष घटना-परम्परया धूलिसाज्जातः, अस्य वर्तमानावस्थां दृष्ट्वा—येषां हृदये ममत्वलेशोऽपि न विद्यते, येषां हृदयं कठिन-प्रस्तरवत् तेऽपि —अथवा ये तुर्किस्थान-निवासिनस्तातारा नितान्तनिर्ममाः कस्मैचन दयाप्रदर्शनाकुशलास्तेऽपि करुणार्द्राः संजनिष्यन्ते।

यहूदिप्रवर! आशासे भवतः सदुत्तरं विषयेऽस्मिन्।

शाइलक्। महामान्य-डिउक्-महोदयाय उद्देश्यं मे पूणतया निवेदितमेव। पवित्र-रविवासरनाम्ना मया प्रतिज्ञातं किल, यो दण्डः पत्रे स्वीकृतः स एव मया ग्रहणीय इति। यदि भवान् मां तस्मात् प्रतिनिवर्तयति, भवतो भेनिस्-नगरस्य स्वाधीनता भविष्यति विपन्ना, भवतः कर्माधिकारोऽपि तथा भविष्यति।

यदि भवान् पृच्छति, "कथं त्रिसहस्र-ड्याकेट् मुद्रा-विनिमयेनार्थ-हीनं नरमांसं वाञ्छामी"ति—तदुत्तरं नाहं दास्यामि। केवलं वक्ष्यामि मनोभावो मम तादृश एव जातः। अपि भवता उत्तरमासादितम्?

यदि मम इन्दुरस्योत्पातो जायेत मम चेच्छा भवेत् सोऽसौ इन्दुरो दशसहस्र-ड्याकेट्व्ययेन मारणीय इति तत्र कथमन्ये स्वमतं प्रकाशयेयुः? अपि सदुत्तरं भवता लब्धम्?

भूयोऽपि मयेदमेव प्रख्यापनीयम् यत् एण्टोनिओ प्रति विद्यते मम महान् विद्वेषो दृढमूलः। तत एव क्षतिं स्वीकृत्यापि अहं विचारालयस्य शरणागतोऽस्मि। आशासे सदुत्तरं भवता सत्य-मासादितम्।

व्यासानिओ। अये कृतान्तक्रूर पाषण्ड! याद्धङ्निष्ठुरतास्रोतः-प्रसारणे तव मतिः नैतदुत्तरं तदुपयुक्तम्।

शाइलक्। अये! त्वत्प्रश्नोत्तरदानार्थं नाहं भेनिस्-नगर-संविधानेनादिष्टोऽस्मि।

व्यासानिओ। अपि विद्वेष-भाजन-जनः सर्वथा हन्तव्यः?

शाइलक् । यो न हननीयः स्यात् कथं तस्मै विद्वेष पोषणम् ?

व्यासानिओ । अनिष्टकारितामात्रेण प्रतिहिंसा न पोषणीया ।

शाइलक् । किं ब्रवीषि ? अपि सर्पाय वारद्वयं दंशनसुयोगं कोऽपि ददाति ।

एण्टोनिओ । व्यासानिओ ! कथं यहूदि-जनेनानेन वृथात्मानं तर्के नियोजयसि ? एनं विहाय वरं गच्छ समुद्रतीरे, तत्र दण्डायमानः सन् समुद्रं जलोच्छ्वास-प्रशमनायादिश, वृकेण सहात्मानं तर्के प्रवर्तय—कथमसौ मेषशावकम् आत्मसात् कृत्वा तस्य मातरमकारणं रोदयति । आकाशाद् भीमप्रवहणशीलेन प्रभञ्जनेन प्रकम्प्यमानं पर्वतगात्रे स्थितं देवदारुनिचयं शब्दसृष्टेर्निवारय । अथवेतोऽपि कठिनतरं कर्तव्यं सुसम्पादय, तथापि चिन्तनवहिर्भूत—कठोरतामण्डित—हृदयस्यास्य यहूदि-जनस्य दयोद्रेकं कर्तुं न शक्ष्यसि । ततः प्रार्थये नास्य सकाशे याच्ञा कार्या न चास्य हृदय-द्रवीकरणाय कश्चन प्रयत्नो विधातव्यः । अपि च—यथा अनायासं त्वरितं मया न्याय्य-दण्डः परिगृह्येत तेन च यहूदि-जनस्यास्य मनस्कामना परिपूर्येत—तथा विधेहि ।

व्यासानिओ । महाजन ! तव ड्याकेट्—त्रिसहस्र-विनिमयेन षट् सहस्राणि गृहाण ।

शाइलक् । अये ! त्वया एकैका ड्याकेट् मुद्रा यदि षड्गुणिता क्रियेत तथाप्यहं न ग्रहीष्यामि । स्वाक्षरित-पत्रानुसारं राष्ट्रिय-विधानमेव केवलं मम काम्यम् ।

डिउक् । यदि दयाप्रदर्शनं भवता न क्रियते कथं भगवत्-सकाशे दया याचिष्यते ?

शाइलक् । नाहं किमप्यन्याय्यमनुष्ठितवान् । तत् कथं भगवद्विचाराद् भेष्यामि ? महाशय ! विद्यन्ते खलु भवतां बहवः क्रीतदासाः, गर्दभ-कुक्कुरादिष्विव तेष्वपि भवतां व्यवहाराः प्रसरन्ति ।

भवन्तस्तैर्जघन्यानि नीचानि कर्माणि कारयन्ति। कथम्? यतो भवन्तस्तान् मुद्राभिः क्रीतवन्तः। तत्र मया किमु वक्तव्यम्—"महाशय! एतेषां मुक्तिर्विधेया; भवतां सन्तानैः सहैतेषाम् उद्वाहकृत्यं सम्पादनीयम्, कथं ते ललाटजलं भूमौ प्रक्षिप्य भारं वहन्ति? तेषां शय्यापि भवतामिव कोमला विधातव्या, भवतां सर्वविधोत्तम-खाद्यामृतेन तेषां रसनातृप्तिः सुतरां विधेया चेति"। मयीत्थं भाषमाणे भवन्तो निश्चितं वदिष्यन्ति "क्रीतदासा अस्मदीयाः" इति।

तद्वदहमपि ब्रवीमि—"पाउण्ड"मितं मांसमहं यद् एण्टोनिओ-शरीरात् क्रीतवान् बहुमुद्रा-विनिमयेन, तन्ममैव प्राप्यम् ततो मया तदवश्यमेव ग्राह्यम्।

डिउक् प्रवर! यदि भवान् तद्विषये अन्यथा कर्तुं वाञ्छति, निश्चितमहं प्रोद्घोषयिष्यामि धिक्कारयोग्यः सर्वथा भवतां विचारः, भेनिसनगर-विधान-निचयो मूल्यहीनः। न्यायविचारमहं प्रार्थये। तद्ब्रवीतु भवान्—सोऽयं न्यायविचारो मया प्रापणीयो नवा?

डिउक्। समुपस्थित-विचार्यविषयस्य सुमीमांसार्थमहं सुपण्डित-व्यवहाराजीव-डक्टर-वेलारिओ-महोदयस्य समानयनाय कञ्चन प्रेषितवान्, यदि नासौ समागच्छेत्—मदर्पित-क्षमताव्यवहारेणाहं दिनान्तरं निर्धारयिष्यामि।

स्यालारिओ। महोदय! अत्र बहिर्भागे तिष्ठति कश्चन पत्रवाहकः डक्टर्-महोदयेन पदुयातः प्रेषितः।

डिउक्। पत्राणि मह्यम् आनय, पत्रवाहकञ्चाह्वय।

व्यासानिओ। एण्टोनिओ! चित्तप्रसादं लभस्व। मा भैषीः। अस्मद्धेतोस्तव रक्तबिन्दुपातात् प्रागेव अस्मद्रक्त-मांसादीनि यथा-सर्वस्वञ्च यद्भद्रिप्रीत्यर्थं समर्पयिष्यामि।

एण्टोनिओ। मेषदलस्य निर्वीर्यतमो मेष इव मृत्युकवलीभवनाय अहमेव उपयुक्ततमः। क्षीणतमं फलं सर्वादौ भुवि पतति।

व्यसानिओ ! जीवन् मच्श्मशानोपरि स्मारकलिपिं संस्थापय— तदेवास्तां तव कर्तव्यं महत् ।

(व्यवहाराजीवस्य करणिक–वेशेन सज्जिताया नेरिसायाः प्रवेशः)

डिउक् । अपि पदुया-धामतः वेलारिओ-सकाशाद् भवान् आगतः ?

नेरिसा । महामान्यवर ! उभयत एव । वेलारिओ-महोदयो भवन्तमभ्यर्थयते ।

व्यासानिओ । अये ! कथं व्यस्त-समस्तः सन् छुरिकां तीक्ष्णतरां करोषि ?

शाइलक् । अस्य वित्तहीन–हतभाग्यस्य देहात् अस्मत्प्राप्य-धनाहरणाय ।

ग्रयासियानो । अये निष्ठुर–यहूदे ! नहुथपानत्तलोपरि परन्तु स्वीयात्मदेशोपरि छुरिकां तीक्ष्णीकुरु । तवोदग्र प्रतिहिंसा-तीक्ष्णतया सह तुलनीया तीक्ष्णता कस्यचनापि वस्तुनो नास्ति । वस्तुतोऽर्ध-तीक्ष्णतापि न विद्यते घातवास्त्रे न वा घातकस्य कुठारे ।

अये ! काचनापि प्रार्थना न तव मर्म स्पृशेत् ?

शाइलक् । तव बुद्धिप्रणोदिता प्रार्थना न कदापि तत् कर्तुं शक्नुयात् ।

ग्रयासियानो । अये निमम कुक्कुर ! त्वं नरकं गच्छ ! यत्त्वं जीवसि तदर्थं देशस्य संविधानावली दूषणीया । त्वं मम स्वधर्ममतं विचालयसि । त्वदर्थमेव पिथागोरस्य मते मम विश्वासो जायते यत् मानवदेहेषु जीव–जन्तूनामात्मानः प्रविशन्तीति । तव निर्ममात्मा पूर्वं निश्चितं वृकस्य कस्यचन शरीरम् अध्यतिष्ठत् । तदनु मानुष-मारणापराधहेतोर्यदा स वृक आत्मोद्बन्धन–काष्ठोपरि स्थापितः तदैव तस्मादुद्बन्धन–काष्ठादुड्डीय पापिष्ठस्य तव मातुर्गर्भ—यत्र त्वमभवस्तत्रैव तवात्मा प्राविशत् । सत्यं खलु वृकोऽसि त्वम्,

प्रवृत्तयस्तव सर्वथा वृकसमाः,—हिंसालोलुपा रक्तपिपासवो बुभुक्षवश्च।

शाइलक्। यतस्त्वं स्वाक्षरित-प्रतिज्ञापत्रान्नासि समर्थो मम प्राप्तव्य-दायमपसारयितुम्, ततस्त्वं केवलमुच्च-भाषणेन स्वीय-श्वासनाली-यन्त्रमुत्पीड़यसि आत्मक्षतिं च करोषि। आत्मबुद्धि-परिष्करणाय यतमानो भव, अन्यथा चिराय सा बुद्धिर्मालिन्यम्-अवाप्स्यति। अहं संविधानं प्रार्थये।

डिउक्। डक्टर बेलारिओ पत्रेऽस्मिन् कञ्चन तरुणं सुपण्डितं व्यवहाराजीवम् अद्य विचारालये नियोगाय अनुमोदितवान्। कुत्रास्ते तत्रभवान् ?

नेरिसा। भवतामनुमतिक्रमेण प्रवेष्टुकामः साम्प्रतं वहिरे-वापेक्षते।

डिउक्। सर्वान्तःकरणेनानुमतिं ददामि। युष्माकं त्रयश्चत्वारो वा प्राग्रेसरीभूय तमत्रानयत। इतोमध्ये न्यायालयेऽस्मिन् सर्वे बेलारिओ-महोदयस्य पत्रोक्तं विवरणं शृण्वन्तु। (नेरिसया सह केचन बहिर्गताः)

करणिकः। (पत्रं पठति) माननीयं विचारपति-महोदयं ससम्मानं विज्ञापयामि यद् भवतां पत्रप्राप्ति-समयत एवाहमसुस्थो वर्ते। किन्तु भवतां पत्रप्राप्तिसमये रोमनगरात् समागतोऽत्रासीत् कश्चन तरुणो व्यवहाराजीवो मत्सन्दर्शनार्थम्—नाम्ना ब्याल थाजार इति। यहूदि-एण्टोनिओ-विवादविषयेऽस्मै सर्वमहं निवेदितवान्। आवां संविधान-पुस्तकानि बहूनि पर्यालोचितवन्तौ। विचार्य-विषयेऽस्य दृढं मतं जातम्। तस्येदृशी गभीरा प्रज्ञा यन्मम प्रशंसा कथञ्चन तत्समकक्ष्या भवितुं नार्हति। मम बहुलानुरोधक्रमेणासौ स्वीय-विद्याबलेन अभिमतं मम संशोध्य भवदनुरोधपालनार्थं तत्र गन्तुकाम आस्ते। एकान्तेयं मम प्रार्थना यद् वयोन्यूनताहेतोर्न तत्रभवान् एनमुपेक्षतामिति।

वस्तुतो नाहमेतादृश-स्वल्पवयस्कमथ च तादृश-परिपक्वमस्तक-धारिणं कदाचन दृष्टवान्। अत्रभवतः ससम्मानपरिग्रहणाय भवत्-सकाशे राजते ममानुरोधो महान्। मम प्रशंसावादो न भवत्वस्य भवद्ग्रहणे कारणम् परन्तु परीक्षणफलेनास्य महामूल्यं भवत्सकाशे सुप्रकटं भविष्यति।

डिउक्। सुपण्डित वेलारिओ-महोदयस्य मतं भवद्भिः श्रुतम्। मन्ये तत्रभवान् आगतप्रायः।

(व्यवहाराजीव-वेशधारिण्याः पोर्शियायाः प्रवेशः।)

सुस्वागतम् सुस्वागतम्; भवतः करमर्दनं कामये (तथा कृत्वा) भवानेव बेलारिओसकाशादागतोऽस्ति?

पोर्शिया। अथ किम्?

डिउक्। भवते स्वागतं विज्ञापये, कृपया आसनपरिग्रहं करोतु भवान्। वर्तमान-विवादविषयो भवतः परिज्ञातः किल।

पोर्शिया। अथकिम्? एतद्विषये सम्यक् विदित-तत्त्वोऽस्मि। एतयोः को नाम वणिक् को वा यहूदिः?

डिउक्। एण्टोनिओ! वृद्ध शाइलक्! उभौ प्राग्रसरी-भवतम्। (उभौ तथा कुरुतः)

पोर्शिया। अपि भवतो नाम शाइलक् इति?

शाइलक्। अथकिम्। नाम्ना शाइलक् अहम्।

पोर्शिया। चमत्कारित्वमयोऽयं विचारविषयः। सर्वथा अद्भुत-संज्ञामावहति। किन्तु बुद्धिबलेन भवता ईदृश-विधानानुग एष विहितो यद् भेनिस्-विधानावली तस्यानुसरणविषये न बाधाप्रदान-समर्था।

(एण्टोनिओ उद्दिश्य) अपि भवान् अनेन कवलीकृतोऽस्ति?

एण्टोनिओ। तथैव कथयति।

पोर्शिया। स्वाक्षरं पत्रेऽस्मिन् भवत एव ? नास्ते तत्र कश्चन सन्देहः ?

एण्टोनिओ। नहि, नास्ते तत्र सन्देहः।

पोर्शिया। ततो दयाप्रदर्शनाय यहूदिमहोदयो बद्धपरिकरो वर्तेत।

शाइलक्। किन्तु का नाम सा बाध्यबाधकता यदर्थमहं दयाप्रदर्शनाय समुद्युक्तो भवेयम् ?

पोर्शिया। किन्तु दयागुणो न बाधकताबाधितः। कारुण्यं प्रसरति—आकाशाद् भूतलवृष्टा मृदुला वारिधारेव। तच्चोभयतो मङ्गलप्रसारि। माङ्गल्यं वहति तद् दात्रे तथा च ग्रहीत्रे समानमेव।

महत्तमेषु महत्तम-नामकमेतत्; तद् राज्ञे शोभते महत्तरं स्वीय-शिरोमुकुटादपि समभ्यधिकम्। राज्ञो राजदण्डस्तस्य पार्थिवशक्तेः प्रतीकम्, राजशक्तेः सम्भ्रम मर्यादादिरक्षणार्थम् अस्य प्रयोजनञ्च सुमहत्। प्रजानां राजोद्दिष्ट-भयसम्भ्रमादिकं सर्वं राजदण्ड-हेतुकमेव।

किन्तु कारुण्यं नाम राजदण्डजनित-प्रभुत्वातिशायि, राज्ञो हृदयसिंहासनाधिरोहणात्।

कारुण्यं नाम भगवतोऽपि गुणविशेषः, राज्ञो न्यायविचारेण सह दयासंमिश्रणात्, पार्थिव राजशक्तिः जगत्पतेः शक्तिं सर्वथा अनुकरोति।

अतएव यहूदिप्रवर! यद्यपि न्यायविचार एव भवतः प्रार्थनो तथापि स्मर्यतां किल—केवल-न्यायविचार-प्रार्थनेन वयं सर्वं एव भगवत्सकाशे मुक्तिविषये चिराय नैराश्यभाजो भविष्यामः। यतः सर्वे वयं जगत्पतिसकाशे दयाप्रार्थिनो ध्रुवम्; अस्माकं सर्वेषामीदृश-दयाप्रार्थना जागतिक-विषयेष्वपि दयाप्रदर्शनायास्मान् उद्बुद्धान् करोतु नाम।

भवतो न्यायविचार-प्रार्थना-संयमनायाहम् इत्थं भाषे। यदि भवान् केवल-न्यायविचारप्रार्थी भवेत् भेनिस्-नगर-सुकठोर-विचारालयः अस्य वणिजो विरुद्धं मतं दद्यादेव।

शाइलक्। मम कार्यफलं मया शिरसैव संधारणीयम्। न्यायानुग-संविधानं मयाऽनुसर्तव्यम्। प्रतिज्ञापत्र-लिखितं मत्-प्राप्तव्यं सर्वमहमवश्यमेव लप्स्ये।

पोर्शिया। अपि न तत्रभवान् ऋणपरिशोध-समर्थः?

ब्यासानिओ। निश्चितं समर्थः। माननीय-विचाराधीश-समीपेऽहं तमर्थं ददे। तत्संख्या-द्विगुणितमुद्रा अपि। यदि सा संख्या यथेष्टा न विवेच्यते—अहं दश-गुणितमर्थं दास्ये इति प्रतिज्ञापत्रं न्यायाधीश-समक्षं स्वाक्षरीकरिष्ये। किञ्च, प्रतिश्रुतिभङ्गे सति मम हस्त-मस्तकहृदया दिकं सर्वं विवर्जयिष्यामीति प्रतिशृणोमि। तथापि यद्दिनैं सन्तुष्यति चेन्निश्चितं ज्ञास्यामि प्रबलविद्वेषो न्याय-विचारमपाकरोतीति।

महाशय! भवन्तं प्रार्थये—स्वकौशलेन भवान् विधान-व्याख्यानम् अस्मदनुकूलं करोतु। महान्यायानुरोधेन क्षुद्रान्यायोऽनुष्ठीयताम्। तेन चास्य निष्ठुर-दुष्टाधमस्यासद्बुद्धिर्निष्फलीक्रियताम्।

पोर्शिया। अये! न तथा कदाचन भवितुमर्हति। भेनिस्-नगर्यां न तादृशी काचन शक्तिरास्ते यत्प्रभावात् सुप्रतिष्ठित-न्याय-विधानं विचाल्येत। एवं कृते परिगृहीत-विधानस्य उदाहरण-रूपेणेतः प्रभृति तत् परिगणयिष्यते, तन्मार्गेण च वहवोऽनर्था देशेऽस्मिन् पदं करिष्यन्ति। तस्मान्नैतद् भविता।

शाइलक्। अये! ड्यानियेल्-महोदयो विचारार्थं; स्वयं समागतः। अहो ड्यानियेल्। अये प्राज्ञ तरुण-विचाराधिप! बहुल-सम्माननभाजनमस्ति भवान्।

पोर्शिया। भवते दत्तं प्रतिज्ञापत्रं सानुग्रहं मह्यं दीयताम्, वारमेकं पश्यामि।

शाइलक् । महामान्य-विधिविशारदोत्तम ! तदिदं गृह्णातु भवान् । (पोर्शियायै ददाति)

पोर्शिया । भवद्दत्तार्थस्य त्रिगुणित-संख्या साम्प्रतं भवते दीयते ।

शाइलक् । किन्तु शपथो मया परिगृहीतः—कठोरः शपथो भगवन्नाम्ना कृतः । किमहं शपथ-भङ्गदोषान्नरकगामी भविष्यामि ? नहि, नहि, समग्र-भेनिस् विनिमयेनापि न तद् भवितुमर्हति ।

पोर्शिया । तन्निश्चितमेतत् —प्रतिज्ञापत्रानुसारेण स्वीकृतिभङ्गो जात इति । ततो विधानबलाद् यहूदिरेतस्य एण्टोनिओ-महोदयस्य हृदय-सन्निकटतम प्रदेशात् "पाउण्ड्" मित-मांसं कर्तितुं समर्थ एव । तथापि ब्रवीमि—यहूदि-महोदयः कृपां प्रदर्शयत्विति । स्वदत्तार्थ-त्रिगुणितसंख्य-मुद्राः परिगृह्य भवान् माम् एतत्प्रतिज्ञा-पत्रच्छेदनायादिशतु ।

शाइलक् । अथ किम् । प्रतिज्ञानुसारम् ऋणपरिशोधनानन्तरं भवानिदं प्रतिज्ञापत्रं छिनत्तु नाम । भवान् उपयुक्त-विचारक इति मे प्रतिभाति । देशस्य संविधानं भवान् जानाति किल । भवतो व्याख्यानं सम्पूर्ण-त्रुटिहीनम् । यस्य संविधानस्य भवान् समुन्नत-स्तम्भरूपः तस्य नाम्नैव भवत्सकाशे मम निवेदनमेतत्—अविलम्बमेव भवानस्य विवादस्य निर्णयं विदधातु ।

स्वीयात्मना शपथ-पूर्वकं ब्रवीमि—मानव-जिह्वाया नास्ते तादृशी शक्तिर्यत्प्रभावान्मम मतपरिवर्तनं भविष्यतीति । मदायत्त-प्रतिज्ञा-पत्र-समयानुसारं सर्वमहं वाञ्छामि ।

एण्टोनिओ । सनिर्बन्धानुरोधो ममायं—महामान्य-विचारपतिः स्वनिर्देशं प्रोद्घोषयतु ।

पोर्शिया । न्यायालयस्य विचारोऽयं यद् भवता स्ववक्षः अस्य यहूदि-महोदयस्य छुरिकामुखे देयमिति ।

शाइलक्। अहो हो! महानुभावो विचारकवरः। चमत्कार-जनकोऽयं युवकः।

पोर्शिया। संविधानार्थोद्देश्य-समवलोकनपूर्वकं विचारालयस्य एतद् ध्रुवं मतं यत् शास्तिविधानं न्यायानुगमेव।

शाइलक्। ध्रुव-सत्यं महानुभवेन कथितम्। अहो महाज्ञानी निरपेक्षोऽयं विचारकः। वयसा तरुणोऽपि भवान् ज्ञानेनातिप्रवीण इति ध्रुवम्।

पोर्शिया। (एण्टोनिओ प्रति) ततो भवान् स्ववक्षः प्रोन्मुक्तं करोतु।

शाइलक्। बाढम्, स्ववक्षः। तदेव प्रतिज्ञापत्रे लिखितम्। पश्यतु भवान् महानुभावो विचारकः—अपि तदेव लिखितं न वा? "हृत्पिण्डस्य सन्निकटतमांशात्" इत्येव लिखितम्।

पोर्शिया। बाढं तदेव लिखितम्। अपि-मांस तोलनार्थ माप-दण्डादिकं सज्जितम्?

शाइलक्। अथकिम्। सर्वमेव सुसज्जं विद्यते। (स्वगतम्)

गृहीत-मांसो हृदय स्थलादयं
यदा करिष्यत्यतिकातर-ध्वनिम्।
मदन्तरात्मा हृदयान्तर-स्थित-
स्तदा समुल्लास-रवं विधास्यति ॥ ११ ॥

पोर्शिया। शाइलक् महोदय! यथाऽयमतिरिक्त-रक्तपात-हेतोर्न म्रियते यथाचास्य क्षतस्थानाद् रक्तपातो निरुध्येत—तदर्थं स्वीयव्यये-नात्र चिकित्सकः कश्चन नियोक्तव्यः।

शाइलक्। अप्येतत् प्रतिज्ञापत्रे कुत्रापि लिखितम्?

पोर्शिया। नहि, किन्तु तेन किम्? कृपाप्रदर्शनार्थं भवतैतत् करणीयम्।

शाइलक। किन्तु, कुत्रापि भवदुक्त-विषयो न मया परिदृश्यते।

पोर्शिया। वणिङ्महोदय! अपि भवतः किमपि वक्तव्यमास्ते ?

एण्टोनिओ। (स्वगतम्)

स्वतो नृशंसे प्रतिहिंसयाऽन्धे
मदीर्ष्यया जर्जर-देहवन्धे।
क्षमैषणा मे विफलार्थना स्यात्
ततो वरं वाञ्छित एष मृत्युः॥ १२॥

(प्रकाशम्) नहि। सम्पूर्ण-दृढमनस्कोऽहं मरणाय सन्नद्धोऽस्मि। व्यासानिओ! करं मयि संप्रसारय, (कर-मर्दनं कृत्वा) शेषभाषणमिदं मम भ्रातः! यत् त्वदर्थं ममेयं दशेति कदापि त्वया न चिन्तनीयम्। मद्विषयं तव पत्नीं ध्रुवं ब्रूहि, मम मधुमय-जीवन-विसर्जनं साऽवश्यं जानातु। त्वां प्रति मम प्रीतिर्भवतु तस्याः परिज्ञाता। मद्विषयकं शोभनं तस्यै ब्रूहि।

व्यासानिओ। एण्टोनिओ! मम पत्नी मम प्राणेभ्योऽपि गरीयसी। तथापि मम जीवनं, तादृशी स्त्री समग्रा पृथिवी वा—मत्पक्षे त्वज्जीवनतो न मूल्यवत्तरा। त्वन्मुक्तये सर्वमेतत् परित्यक्तुमहं वद्धपरिकरो राजे। अस्मै नरखादकाय सर्वं दातुं प्रस्तुतोऽहम्।

पोर्शिया। यदि भवतः पत्नी अत्र समुपस्थिता अभविष्यत् निश्चितं सा एतदर्थं भवते धन्यवादान् नादास्यत्।

ग्रयासियानो। ममापि पत्नी विद्यते, सा मम प्राणप्रियेत्यपि ध्रुवम्, तथापि ममेयमिच्छा—सा साम्प्रतं स्वर्गे तिष्ठतु नाम, यथा तत्र स्थित्वा सा अस्य नरखादकस्य यहूदिवरस्य मनः परिवर्तन-साधनाय कस्यैचन शक्तये प्रार्थनां विदध्यात्।

नेरिसा। महाशय! सौभाग्यं भवतो यद् भवतः पत्नी अत्र नोपस्थिता, अन्यथा भवतां पारिवारिक-जीवनम् अशान्तिवहुल-मभविष्यत्।

शाइलक्। (स्वगतम्) खृीष्टान-स्वामिनः सर्वे कीदृशा नु? आस्ते ममापि कन्यैका, यदि इहूदि-दस्युवंश्य-"वारावासानां" कश्चनापि तस्याः पाणिग्रहणम् अकरिष्यत् तदपि मे परमानन्दस्य कारणमभविष्यत्। (प्रकाशम्) निरर्थकं समयो याप्यते। प्रार्थये अविलम्बं विचारको मतं प्रकाशयत्विति।

पोर्शिया। अस्य वणिजः "पाउण्ड" मित-मांसं त्वया प्राप्तव्यम्। विचारालयस्य मतेन तत् तव प्राप्यम्। विधानमपि तद्विषये एकमतम्।

शाइलक्। धन्योऽस्ति असीम-न्यायपरायणो विचारकः।

पोर्शिया। भवता तद्वक्षःस्थलात् तन्मांसं कर्तनीयम्, नास्तेऽत्रापि विचारालयस्य मतानैक्यम्।

शाइलक्। अहो! धन्योऽयं महामान्य-विचारकः। अहो चमत्कारजनकं मतं विचारकस्य। (एण्टोनिओ उद्दिश्य) एहि सुसज्जो भव।

पोर्शिया। यहूदिवर! क्षणं तिष्ठतु भवान्। आस्ते पुनरपि विवेच्यो विषयः। प्रतिज्ञापत्रमिदं बिन्दुमात्र-रक्तक्षरणायापि तुभ्यमधिकारं नादात्। प्रतिज्ञापत्रे सुस्पष्टं लिखितम्—"पाउण्ड"-मितं मांसम्। तत् त्वया प्रतिज्ञापत्रानुसारेण "पाउण्ड"मितं मांस-मवश्यमेव नेतव्यम्। किन्तु तदवसरे यदि बिन्दुमात्रं रक्तमपि निःसरति तदा भेनिस्-देशीय-संविधानानुसारेण तव सर्वा सम्पद् भूम्यादिकाऽन्या च भेनिस् सर्वकारस्यायत्तीभूता भविष्यति।

ग्रयासियानो। धन्यो निरपेक्षो विचारकः। यहूदे! सावधानं शृणु, मयाप्युच्यते धन्यो महाज्ञानी विचारकोऽयम्।

शाइलक्। अपि भवदुक्तं विधिसम्मतम्?

पोर्शिया। संविधानांशोऽसौ साम्प्रतमेव तुभ्यं प्रदर्श्यते। न्यायविचारं भवान् अवश्यमेव प्राप्स्यति।

अयासियानो। धन्यो महाज्ञानी विचारकः।

शाइलक्। ततो मया पूर्वप्रस्तावः स्वीक्रियते--प्रतिज्ञापत्रलिखिताभ्यस्त्रिगुणाभ्यधिका मुद्रा मया ग्रहीष्यन्ते।

व्यासानिओ। मुद्रा अवश्यं दास्यामि।

पोर्शिया। धीरं यहूदिवर! यहूदिवरेण केवलं संविधानम् अनुसरणीयम्। प्रतिज्ञापत्रलिखितं वस्तु विना नान्यत् किमपि अस्मै देयम्।

अयासियानो। रे यहूदिवर! अये न्यायकुशलो महामान्य-महाज्ञानी विचारकः।

पोर्शिया। तद् यहूदिवर! सुसज्जो भव मांसग्रहणाय। किन्तु निर्गलिते बिन्दुमात्रेऽपि खीष्टधर्मावलम्बिनो रक्ते—यद्वा सति तुलामानावसरे "पाउण्ड" परिमाणात् तिलमात्रयाप्यधिके न्यूने वा मांसे तव मृत्युदण्डोऽनिवार्यो भविष्यति। तव सर्वा सम्पत् सर्वकारायत्तीभूता निश्चितं भविष्यति च।

अयासियानो। अहो! ड्यानियाल् स्वयमागतः; द्वितीयो ड्यानियाल् वा समायातः। विधर्मिन् यहूदिवर अधुनास्माकं वशमेष्यसि।

पोर्शिया। कथम् इतस्ततो विलोकन-तत्परोऽसि? यहूदिवर! प्रतिज्ञापत्रानुसारिणीं शास्ति विधेहि।

शाइलक्। मह्यं मम मूलधनं प्रत्यर्पयतु भवान्—अहं स्थानादस्माद् बहिर्यास्यामि।

व्यासानिओ। मूलधनं तुभ्यं निश्चितं दास्यामि।

पोर्शिया। एष यहूदिवरः प्रकाश्य विचारालये प्रथमतोऽर्थ-ग्रहणविषयेऽसम्मतिं विज्ञापितवान्, ततस्तेन प्रतिज्ञापत्रानुसारेण केवलं विधानमनुसरणीयम्।

अयासियानो। ततो भूयोऽपि उद्घोषयामि—ड्यानियाल् स्वयमेव

समागतः। अये यहूदिवर! "ड्यानियाल्" शब्दशिक्षणाय त्वं धन्यवादार्होऽसि।

शाइलक्। तत् किं नाहं मम मूलधनमपि प्राप्स्यामि?

पोर्शिया। तव प्रतिज्ञापत्रानुसरण एव केवलमधिकारः, नान्यत् किमपि त्वया प्राप्तव्यम्।

शाइलक्। दुष्टग्रहस्तमनुसन्दधातु। नाहमत्र स्थित्वा समयक्षेपमभिलषामि।

पोर्शिया। यहूदिवर! शृणु, भेनिस् नगराधिवासि-वणिग्-वरस्य प्राणनाशाय कूटमन्त्रणाकरणहेतोः संविधानानुसारं त्वया तव वित्तार्धम् एण्टोनिओ-महोदयाय अन्यदर्धं च भेनिस सर्वकाराय दातव्यम्। तव जीवनमपि चिराय लोपस्यान्न वेत्यपि डिउक्-महोदयस्य व्यक्तिगत-मतमपेक्षते। तत् त्वया डिउक्-महोदय-सकाशे जीवन-भिक्षा करणीया।

ग्रयासियानो। प्रार्थयस्व महामान्य-विचारपतिसकाशे तुभ्यम् उद्बन्धन-रज्जुप्रदानाय। किन्तु सर्वंवित्तो सर्वकारायत्ते जाते कुतो वा तव बन्धनरज्जुर्मिलिष्यति? ततो राष्ट्राधिकारव्ययेन त्वं मृत्यु-कवलमेष्यसि।

डिउक्। यथा त्वं खीष्टधर्मावलम्बिनो यहूदि-जनस्य च पार्थक्यं ज्ञातुं शक्नुयास्तदर्थं त्वत्प्रार्थनं विनापि अहं त्वज्जीवनं ददे।

तव वित्तस्यार्धम् एण्टोनिओ-महोदयस्यैव, अन्यदर्धं राष्ट्राधिकारायत्तम्। ततो यदि त्वं कातर-प्रार्थनं निवेदयेः, राष्ट्राधिकारः किञ्चिद्धनदण्डादानक्रमेणापि सन्तुष्टो भविष्यति।

पोर्शिया। अत्र कारुण्यस्यावकाशः राष्ट्रिय-धनाधिकारविषये। एण्टोनिओ-प्राप्य धनविषये तु न तादृशोऽवकाशः स्यात्।

शाइलक् । नहि, मम जीवनं सर्वस्वञ्च परिग्रहणीयम् । न कथञ्चन क्षमा विधेया । यस्याश्रयेण गृहं ममास्ते सुरक्षितम्, तस्याश्रयस्यापसारणं नाम मम गृहस्य हस्तान्तरीकरणम् । येन वित्तेन मम जीवनयात्रानिर्वाहः तस्य हस्तान्तरीकरणेन च मम जीवनावसानं सम्पद्यते ।

पोर्शिया । एण्टोनिओ महोदय ! अपि भवान् किञ्चिदस्य दयां दर्शयितुं शक्नोति ?

ग्रयासियानो । उद्बन्धन-रज्जुमात्रम् । भगवन्नाम्ना शपथस्ते अतोऽभ्यधिकं किमपि न ।

एण्टोनिओ । यदि महामान्य-डिउक्महोदयस्य विचारालयस्य चापत्तिकारणं न भवेत्, शाइलक्-महोदयस्य वित्तार्धविषये यो दण्डो मत्सरूपकीं दत्तः ततोऽस्य मुक्तिर्देया तेनाऽहं सुखी भवेयम् ।

पुनरपि कर्तृपक्षसमीपे ममेदमावेदनम्—अस्य सम्पत्तेरुत्तरार्धविषये अहं नियामकः स्याम्—येन शाइलक्महोदयस्य मृत्योरनन्तरं तदर्धं-विदामहम् अस्य दुहितुः साम्प्रतिक-हरणकारिणे दातुं समर्थो भविष्यामि ।

एतदादि-क्षमादानार्थम् अनेन पुनर्विषयद्वये अवधानं देयम्—प्राथम्येन एषोऽचिरेण कालेन ख्रीष्टधर्मावलम्बी भविष्यति । द्वितीयतः—जीवनान्तकाले अस्य यहूदि-महोदयस्य सर्वं वित्तं—यत्किञ्चिदायत्तीभूतं तत् तस्य दुहितुश्च जामातुर्लरेञ्जो-महोदयस्य च भविता । एतद्विषयकं दानपत्रमधुनैव महामान्य-विचारालय-समक्षम् अनेन स्वाक्षरीकरणीयम् ।

डिउक् । एतदनेनावश्यं करणीयम् । अन्यथा येयं साम्प्रतं मया घोषणा कृता—अस्य जीवनदानं करिष्यामीति सा मया प्रत्याहार्या स्यात् ।

पोर्शिया। यहूदे! अपि सम्मतोऽसि? आस्तेऽन्यत् किमपि वक्तव्यं वा?

शाइलक्। अहं सम्मतोऽस्मि।

पोर्शिया। करणिक! दानपत्रमेकं लिख।

शाइलक्। नाहं स्वस्थतां भजे, अतो गमनायानुमतिर्देया। स्वाक्षरीकरणाय प्रेरितं पत्रं स्वाक्षरीकरिष्यामि।

डिउक्। गमनानुमतिर्दीयते, किन्तु स्वाक्षरीकरणमवश्यमेव विधेयम्।

ग्र्यासियानो। ख्रीष्टधर्मावलम्बन-समये तव धर्मपितृद्वयस्य प्रयोजनमास्ते। यद्यहं विचारकोऽभविष्यं मन्मतेन तव दशधर्मपितृ-संस्थानमभविष्यत्। किञ्च, दीक्षाकालीन–पवित्र-जलाधारसन्निकर्ष-मपहायाहं त्वां यूपकाष्ठमनेष्यम्।

(शाइलक् वहिर्गतः)

डिउक्] (पोर्शियामुद्दिश्य) महोदय! अस्मद्गृहे भोजनाय सनिर्वन्धोऽनुरोधो विज्ञाप्यते।

पोर्शिया। महोदय! सविनयम् अक्षमता-निबन्धना क्षमा मया प्रार्थ्यते। मया अत्यवश्यमेवाद्य रात्रौ "पदुया"-गमनं कार्यम्। ततः साम्प्रतमेव यात्रा कार्या।

डिउक्। झटिति गमनं भवतोऽनिवार्यमिति सत्यं दुःखितोऽस्मि।

एण्टोनिओ-महोदय! भवानस्य सन्तोषं सम्पादयतु। मन्मतेन भवान् अस्मै बहु धारयति।

(डिउक्प्रभृतीनां प्रस्थानम्)

व्यासानिओ। मान्यवर! भवतो बुद्धिप्रभावान्मम बन्धुरहञ्च कठोर-शास्तिभ्यः समुद्धारं प्राप्तवन्तौ। अस्मै उपकाराय परम-कष्टस्वीकरणाय च यहूदिप्राप्तव्य-त्रिसहस्र-ड्याकेट-मुद्रा भवते दातुमिच्छामि।

एण्टोनिओ। एतदतिरिक्तं – प्रेम्णा सेवया च भवत्परितोष संपादनं कर्तुं चिरकृतज्ञा वयं बद्धपरिकराः स्मः।

पोर्शिया। पश्यतु महोदय! आत्मसन्तोषः सर्वकार्येषु श्रेष्ठः पुरस्कारः। भवतां समुद्धार-साधनेन स मया अवाप्त एव। ततो मन्ये परिश्रमस्य सर्वोत्तम-पुरस्कारो मया लब्ध एव।

अर्थं प्रति न मे वर्तते कदाचन विशेषासक्तिः। किन्तु एतत् केवलं प्रार्थये—सति पुनर्दर्शने भवद्भिरस्मत्परिज्ञानं स्यादिति। भवतां कुशलं संप्रार्थ्य गन्तुकामोऽस्मि।

व्यासानिओ। तथापि भवन्तं विषयद्वयं याचे। प्राथम्येन—अस्मत्तः किञ्चिदभिज्ञान-ग्रहणम्, द्वितीयतः एतत्-प्रार्थनहेतोः क्षमाम्।

पोर्शिया। भवदाकूतिरलङ्घनीयेति हेतोः स्वीकृतिर्मयाऽवश्यं करणीया। तथा सति, एण्टोनिओ-महोदयो मह्यं स्वहस्त-परिहित-कररक्षणक-द्वयं ददातु।

(व्यासानिओ उद्दिश्य) भवतः प्रीतिचिह्न-रूपेणाहं भवतोऽङ्गु-रीयकं वाञ्छामि। भवतः करो न दूरेऽपसारणीयः। ततोऽभ्यधिकं नाहं वाञ्छामि। आशासे मत्प्रीत्यर्थं न भवान् प्रत्याख्यानपरो भविष्यति।

व्यासानिओ। अहो दुःखम्! अङ्गुरीयकं तुच्छमेव। कथ-मेतद्दानेनाहमात्मानं क्षुद्रीकरिष्यामि?

पोर्शिया। एतद्व्यतिरिक्तं नाहमन्यत् किमपि वाञ्छामि। केवलम् एतदेव मम मनो लिप्सते।

व्यासानिओ। अस्याङ्गुरीयकस्य आर्थिकमूल्यं विना मूल्या-न्तरमपि राजते। ततः प्रोद्घोषयामि—एतदङ्गुरीयकं विना मेनिस्-नगरस्य मूल्यवत्तमं वस्तु—प्रोद्घोषणबलेनापि भवतेऽहमवश्यं दास्ये। केवलमङ्गुरीयकार्थं भवन्तं क्षमां याचे।

पोर्शिया। महाशय! द्रव्यप्रदान-प्रस्तावसमये वदान्यता–प्रदर्शने भवान् पटुरस्ति। प्रथमं भवानेव प्रार्थनाय मां प्रोत्साहितवान्, कृते तु प्रार्थने भवानेव प्रत्याख्यानपरो मां प्रत्याख्यान-पटुत्वमपि शिक्षयति।

व्यासानिओ। प्रिय भद्रमहोदय! मम पत्नी मह्यमङ्गुरीयक-मिदं दत्तवती। अङ्गुरीयक-प्रदानकाले सा मां शपथवद्धमकरोद् यत् नैतदङ्गुरीयकं कदाचन विक्रेतव्यं न वा दातव्यं नापि वा कदाचन हारयितव्यं केनापि प्रकारेण।

पोर्शिया। बुद्धं सर्वम्। यदा कोऽपि नाभिलषति दातुं तदा स ईदृश-चातुर्यमेवावलम्बते। यदि भवतः पत्नी न भवेद् विकृत-मस्तिष्का, जानीयाच्च कीदृशेनोपकार-बलेनाहमस्याङ्गुरीयकस्य भाजनं जातः, तर्हि न सा कदाचन एतदर्थं रोषं करिष्यति। भवतु, भवते नमः। आवां गच्छावः।

(पोर्शिया-नेरिसयोः प्रस्थानम्।)

एण्टोनिओ। महानुभव व्यासानिओ! अस्मै देयमङ्गुरीयकम्। अस्य स्वकीया पुरस्कारार्जन-योग्यता त्वयि मम वन्धुता च—उभे मिलित्वा तव पत्न्यादेशमतिक्रामतः।

व्यासानिओ। ग्रयासियानो! पश्चाद्धावनं कुरु, अङ्गुरीयकं तस्मै देहि च। पुनः शक्यते चेदसौ एण्टोनिओ-महोदयस्य गृहे आनेतव्यः। गच्छ, त्वरितं गच्छ।

(ग्रयासियानो द्रुतं निष्क्रान्तः)

आवां तवैव गृहं गच्छावः। परेद्युः प्रातरेवावां वेलमण्ट-भूभागे गच्छावः। चल, एण्टोनिओ! चल।

(उभयोः प्रस्थानम्।)

———

पट-परिवर्तनम्

(भेनिस्-राजपथः)

(पूर्ववत् छद्मवेश-धारिण्योः पोर्शिया-नेरिसयोः प्रवेशः)

पोर्शिया। यहूदि-महाशयस्य गृहमनुसन्धाय तस्य स्वाक्षरं अस्य दानपत्रस्योपरि लब्धव्यम्। यथा आवां पत्योरावयोर्दिनात् पूर्वं गृहं गच्छेव तदर्थम् अद्यैव रात्रौ आवाभ्यां यात्रा कार्या। दान-पत्रमिदं लरेञ्जो सादरं ग्रहीष्यति।

(ग्रयासियानो-महोदयस्य प्रवेशः)

ग्रयासियानो। सौम्य महोदय! सौभाग्याद् भवतो दर्शनं लब्धम्। व्यासानिओ-महोदयः पुनरपि सुष्ठु विचिन्त्य भवतो-ऽङ्गुरीयकमिदं प्रेषितवान्। किञ्च, भोजनसमये भवतो दर्शनप्रसादश्च तेन प्रार्थ्यते।

पोर्शिया। अहो दौर्भाग्यान्नैश-भोजनेऽसमर्थोऽहम्। किन्तु निश्चितम् अङ्गुरीयकमिदं मया ग्राह्यम्। पुनः प्रार्थ्यते युवकोऽयं शाइलक्-महोदयस्य गृहं प्रति नेतव्यः।

ग्रयासियानो। निश्चितम्।

नेरिसा। महाशय! भवता सह मया आलापः करणीयः। (पोर्शियां प्रति जनान्तिकम्) मम पत्युः सकाशाद् अङ्गुरीयकं लब्धुं यतिष्ये। असावपि आमरणं नैतदङ्गुरीयकं त्यक्ष्यतीति प्रतिश्रुतवान्।

पोर्शिया। (सस्मितम् नेरिसां प्रति जनान्तिकम्) निश्चितं तथा कुरु। ततो दर्शनानन्तरं पुरुषाभ्यामेव दत्तवन्तौ अङ्गुरीयके इति शपथ-धर्म-परिप्लावित-कलेवरौ तौ करिष्यावः। (प्रकाशम्) त्वरितं गच्छ; जानासि किल कुत्राहं स्थास्यामीति।

नेरिसा। (ग्रयासियानों प्रति) सहृदय महोदय! कृपया मया सहागत्य शाइलक् महोदयस्य गृहं संप्रदर्शय।

(उभयोः प्रस्थानम्।)

(समाप्तं चतुर्थ-दृश्यम्।)

पञ्चम-दृश्यम्

(पोर्शियाया वेलमन्ट-गृहसंलग्न-वीथिका)

(लरेञ्जो-जेसिकयोः प्रवेशः)

लरेञ्जो। पश्य जेसिके! कीदृशी समुज्ज्वला ज्योत्स्ना! ईदृश्यां कस्याञ्चिद् यामिन्यां जेसिका-सुन्दरी धनि-यहूदिगृहात् निःशब्द-पदसञ्चारं पलायमाना नगण्य-प्रणयिना सह भेनिस्—नगरीतः वेलमन्ट-पर्यन्तं समागतवती।

जेसिका। पुनरीदृश्यामेव कस्याञ्चित् ज्योत्स्ना प्लावित-रजन्यां युवक-लरेञ्जो स्वीय-प्रणयिनी-सकाशे गभीर-प्रेमविषये शपथमकरोत्, तस्य यथार्थ-प्रेमनाम्ना प्रतिज्ञाय तस्या हृदयमहरच्च।

दृष्टन्तु पश्चादुभयोः प्रतिज्ञयो-
र्नैकापि याथार्थ्यवहा ह्यभूदिति।
अन्वेष्टुकामोचित-दण्डमुत्कटं
पश्यत्यसौ न्याय-विधानपुस्तकम्॥ १३॥

लरेञ्जो। पुनरीदृश्यामेव कस्याञ्चन ज्योत्स्ना-धवलरात्रौ क्षीणा सुन्दरी विवादप्रिया जेसिका तस्याः प्रेमास्पदं तिरस्कृतवती, अदः प्रेमास्पदञ्च ताम् अक्षमत।

जेसिका। यद्यन्यः कश्चन समयेऽस्मिन्नागमिष्यत् निश्चितमहं ज्योत्स्नारात्रि-वर्णन-विषये त्वां पराजितमकरिष्यम्। किन्तु कस्यचन पादशब्दो मया श्रूयत इव।

(प्रविशति ष्टिफानो)

लरेञ्जो। रात्रिनिस्तब्धतानाशपूर्वकं त्वरित-वेगेन कोऽत्रायाति?

ष्टिफानो। कश्चन बन्धुः।

लरेञ्जो। को बन्धुः, किं तस्य नाम?

ष्टिफानो। मम नाम ष्टिफानो इति। अद्य मया कश्चन संवादः

समानीतः यन्मम कर्त्री अद्य यामिन्यवसानात् प्रागेव स्थानेऽस्मिन् समागमिष्यति। सा खृीष्टान-धर्मावलम्बिनां पवित्र-स्थानेषु भ्रमणरता प्रार्थयते, येन तस्या विवाहित-जीवनं सुखपूर्णं भवेत्।

लरेञ्जो। तया सह अन्ये के समागमिष्यन्ति ?

ष्टिफानो। केवलं काचन परिचारिका कश्चन सन्न्यासी च। ज्ञातुमिच्छामि अस्माकं गृहस्वामी समायातो नवेति।

लरेञ्जो। नहि, तस्य पुनरागमनविषये वयं किमपि न जानीमहे। एहि जेसिके! गृहाभ्यन्तरं गच्छावः गृहकर्त्रीं यथायथमभ्यर्थयितुं यतावहे च।

(लन्सलट् प्रविशति)

लन्सलट्। अहो हो, अहो हो!

लरेञ्जो। को नु आह्वयति ?

लन्सलट्। भोः! अपि लरेञ्जो महोदयो भवता दृष्टः ?

लरेञ्जो। वृष इव मा शब्दायस्व, लरेञ्जो अत्रैवास्ते।

लन्सलट्। अये! कुत्रासौ, कुत्र ?

लरेञ्जो। तत्रैव।

लन्सलट्। स विज्ञापनीयो यन्मम प्रभुर्व्यासानिओ-महोदय-सकाशात् संवादवाहकः कश्चन समायातः। श्रृङ्गपूरमसौ सुसंवाद-मानीतवान्। मम प्रभुः प्रभातात् प्रागेवात्र समागमिष्यति।

(लन्सलट् प्रस्थितः)

लरेञ्जो। एहि प्रियतमे! गृहाभ्यन्तरे आगच्छ। तत्र वय-मेतेषां प्रत्यागमनं प्रतीक्षामहे। अथवा वयमत्रैव तिष्ठामः। स्टिफानो! सदयं गृहाभ्यन्तरं समागत्य सर्वान् विज्ञापय यत् तेषां कर्त्री समायाता। सङ्गीतज्ञं कञ्चन वाद्यकरञ्च वहिरागमनाय सानुनयं प्रार्थयस्व। (स्टिफानो प्रस्थितः)

अहो जेसिके! पश्य पश्य! कीदृशी सुन्दरी ज्योत्स्ना उच्च-

भूमितलोपरि प्रसुप्ता राजते ! वयमत्र स्थित्वैव सङ्गीत-सुधां पिवामः । मनोरमा निस्तब्धता मधुरा च रजनी—एतद्द्वयं मधुर-लयतानैरेव केवलमुपभोग्यम् । जेसिके ! अत्र एहि । (नेपथ्ये सङ्गीतम् ।)

अमृत-क्षरणपरा रजनी मनोहरा
समायाति प्रीतिनिर्झरिणी,
ज्योत्स्ना रजतसारा दिशि दिशि संप्रसारा
विलसति नन्दन-नन्दिनी ।
तारका शान्तिधरा शुभ-सुख-संचारा
स्फुरति सा सदा सुहासिनी ।
समीर-धारा वरा विभुपद-स्पर्शकरा
वहति रे विश्वविमोहिनी ॥

जेसिका । न जाने कथं सङ्गीतध्वनिं श्रुत्वैवाहं विषण्णा भवामि ।

लरेञ्जो । अहो ! सङ्गीतस्यानिर्वचनीयता ! बोधशक्तिरहितो निर्ममो भयङ्करो जन्तुरपि नास्ति—यः सङ्गीत-प्रभावात् स्वल्पसमयमपि आत्मस्वभावं न विस्मरति ।

स्वर-लय-तालयुक्तं सङ्गीतं श्रुत्वा यो न गलति स विश्वघात-कता-शठता-चौर्यप्रभृतिषु प्रवीणो ध्रुवम् । तस्य मनोभावा रात्रेस्तमसा परिपूर्णाः, अनुभूतयश्च तस्य नारकीयाः । ईदृशो जनो न विश्वास-भाजनम् । शृणु पुनरपि सङ्गीतम् ।

(नेपथ्ये पुनरपि तदेव सङ्गीतं धोरं चलति ।)

(अन्यतः पोर्शिया-नेरिसयोः प्रवेशः ।)

पोर्शिया । आलोकोऽसौ दृश्यते मम प्रासादाभ्यन्तरे । पश्य, तस्य रश्मयः सुदूरं सम्प्रसारिताः किल । अस्यां पापपूर्ण-धरायां शुभं कर्म एवमेव चतुर्दिक्षु स्वीयालोकं विस्तारयति ।

नेरिसा। चन्द्रमसि किरणजालं विस्तारयति आलोकोऽयं नास्माकं दृष्टेर्गोचरीभूत आसीत्।

पोर्शिया। एवं महती कीर्तिः क्षुद्र-कीर्तिं म्लापयति। यावद् राजा नायाति तावद् राजप्रतिनिधी राजवत् प्रभावं विस्तारयति, समागते स्वयं राजनि तस्याडम्बरावलीं निःशेषतां याति। यथा समुद्राद् बहुदूरे प्रवहन्ती नदीधारा क्रमेण समुद्रसङ्गमे समुद्रे लीना भवति। अहो सङ्गीतम्! नेरिसे! सङ्गीतं श्रृणु।

(नेपथ्ये सङ्गीतम्)

श्रृणु प्रिय-सखि! श्रृणु रे
प्रीतिगीतिं श्रृणु रे।
कृष्ण-घनो विदूरितः पूर्णचन्द्रः समुदितः
धावति तरणी प्रेमसागरे॥
विजयिनी मधुमयी रजनी
विश्वजन-मनोमोहिनी।
आनन्दामृत-तटिनी
मां नन्दयतु सारात् सारे॥

नेरिसा। देवि! तव पारिवारिक-कलाविदां सङ्गीतमिदम्।

पोर्शिया। सत्यम्, अनुकूलां पारिपार्श्विकीम् अवस्थां विना किमपि न शोभते। रात्रौ सङ्गीतं निश्चितं दिवसान्मधुरतरं प्रतिभाति।

नेरिसा। देवि! रात्रेर्निस्तब्धतैव तत्र कारणम्।

पोर्शिया। अनवधान-जनसकाशे काकस्य भरत-पक्षिणश्च सङ्गीतं सममेव। किञ्च, यदा दिवाभागे सर्वे हंसाः कूजनरता विचरन्ति, तदा "नाइटिंगेल" (बुलबुल) पक्षिणः सङ्गीतं "रेन्" पक्षिणः सङ्गीतेन तुल्यमूल्यं प्रतिभाति। यथायथ-सम्माननम् अवश्यमेव समुपयुक्त-कालमपेक्षते।

अये शान्तिः। सङ्गीतस्य विरामो जातः (उभे परिक्रामतः)।

लरेञ्जो। यदि मम श्रवणविषये प्रमादो न जातः, ध्रुवं पोर्शियायाः कण्ठध्वनिर्मया श्रुत एव।

पोर्शिया। (विहस्य) अन्धो यथा सङ्गीतं श्रुत्वैव कोकिलं जानाति, तथैव लरेञ्जो मम कर्कश-ध्वनि-श्रवणमात्रं मां परिज्ञातवान्।

लरेञ्जो। माननीये देवि! भवती गृहं प्रत्यागतवतीति हेतोः भवतीम् अभिनन्दयामि।

पोर्शिया। आवाम् आवयोः पत्योः कृते प्रार्थनापूर्वकं परिभ्रमणरते आस्व। आशास्वहे आवयोः सम्प्रार्थन-फलेन तयोर्मङ्गलवृद्धिर्भविष्यति। अपि तौ प्रत्यागतवन्तौ ?

लरेञ्जो। नहिं भद्रे! नहि। यद्यपि तौ नागतौ तथापि कश्चन समागत्य घोषितवान् यत्तौ शीघ्रं समागमिष्यत इति।

पोर्शिया। नेरिसे! शीघ्रमन्तर्गच्छ, सर्वानाज्ञापय, यथा आवयोरनुपस्थितिविषये मम पतिं कोऽपि किमपि न वदेदिति। लरेञ्जो! जेसिके! युवामपि न किञ्चित् तौ वदताम्।

लरेञ्जो। भद्रे! अनभ्यस्तमावयोः पर-समालोचनम्, ततः कुतो भीतिः ?

(नेपथ्ये तूर्यध्वनिः)

नेरिसा। तूर्यध्वनितः परिज्ञायते व्यासानिओ-महोदयोऽपि प्रत्यागत इति। तदहमन्तर्गच्छामि त्वरितं प्रत्यागमिष्यामि च।

(नेरिसा वहिर्गता)

(ततः प्रविशन्ति व्यासानिओ-एण्टोनिओ-ग्र्यासियानो-महोदया अनुचराश्च।)

पोर्शिया (स्वगतम् आलोकं दित्साामि किन्तु चपला न भवेयम्। चपला नारी करोति पतिं गुरुभारम्। अहो व्यासानिओ मदर्थं न कदाचन तादृशो भवतु। किन्तु भगवदिच्छा सर्वार्थसाधिनी।

नाथ ! गृहागतं त्वां स्वागतसम्भाषणं विज्ञापयामि ।

व्यासानिओ । देवि ! धन्यवादांस्तुभ्यं ददे । मम वन्धवे स्वागतसम्भाषणं विज्ञायय । एष एव स एण्टोनिओ-महोदयः यत्सकाशेऽहं सहस्रधा वद्धोऽस्मि ।

एण्टोनिओ । यथा तथा वा वन्धनमस्तु, साम्प्रतं विमुक्तोऽस्मि ।

(नेरिसा पुनः प्रविशति)

पोर्शिया । महोदय ! अस्मद्गृहे भवतः शुभागमनं सर्वान्तःकरणं वृणे । भवतोऽभिनन्दनं न केवलं वाचिकं परन्तु अन्यादृशं भवतु इत्यभीप्सया वाचनिकमभिनन्दनं संक्षिप्तं करोमि ।

ग्रयासियानो । (नेरिसामुद्दिश्य) सत्यमहं विचारकमहोदयस्य करणिकाय तदङ्गुरीयकं दत्तवान् ।

पोर्शिया । इतोमध्ये विवादसूचना ? तत्र किं कारणम् ?

ग्रयासियानो । किञ्चन चक्राकृति-सुवर्णखण्डम्—अङ्गुरीयकमेकम् । तदुपरि लिखितमासीत्—यथा ते लौहशिल्पिनो यथातथा च्छुरिकोपरि लिखन्ति —'प्रेमवद्धो भव, न मां त्यज" इति ।

नेरिसा । किम् ? अङ्गुरीयके अङ्कित-श्लोकविषये तस्य मूल्य-विषये वा किं त्वया कथ्यते ? ममाङ्गुरीयकप्रदानसमये त्वया प्रतिज्ञातमासीत्—मृत्युसमयपर्यन्तं त्वमेतदङ्गुरीयकं धारयिष्यसीति । न भवतु मदर्थं तव तादृशोदग्र-प्रतिज्ञाहेतोरपि प्रतिज्ञाविषये त्वया सम्माननं प्रकटनीयमेव । विचारकस्य करणिकाय तद् दत्तमिति कथ्यते । सत्यं नु स करणिकस्तस्य वदनोपरि न कदाचन श्मश्रु-गुम्फलेशमपि धारयिष्यति ।

ग्रयासियानो । यदि पूर्णवयोऽवाप्ति-पर्यन्तं स जीवेत् निश्चित-मसौ श्मश्रु-गुम्फभूषितो भविष्यति ।

नेरिसा । दीर्घं जीवन्ती नारी यदि काले पुरुषाकाराकारितो भवेत् तदैव तादृश-घटनायाः सम्भवो नान्यथा ।

ग्रयासियानो। न हि। अहं तव करस्पर्शपूर्वकं शपथं करोमि कस्मैचन युवकायैवाहं तदङ्गुरीयकं दत्तवान्। वयसा स तरुण एव। स न स्थूलो न च दीर्घाकृतिः। किन्तु भाषणकुशले तस्मिन् करणिकेऽङ्गुरीयकं याचमाने नाहं तं प्रत्याख्यातुं समर्थोऽभवम्।

पोर्शिया। सरलमहं भणामि। तव पत्नी अङ्गुरीयकमिदं त्वत्करे प्रेमशपथपूर्वकं दत्तवती। तत इदं चरम-दाम्पत्यप्रेम-निदर्शनरूपेण तवास्थिमज्जया सहैव निलीनं स्यात्। तत्तु त्वया यथेच्छं दत्तमिति हेतोः तव दोषोऽवश्यमेव घटितः।

मयापि मम प्रियतमायास्मै अङ्गुरीयकमेकं दत्तम्। तेनापि अकुण्ठ-शपथः कृतो यत् तदङ्गुरीयकं जीवन-विनिमयेनापि न हस्तान्तरितं भ.वष्यति।

मत्पतिनाम्ना शपथमहं कुर्वे यन्मम पतिः कदाचन तदङ्गुरीयकं हस्तान्तरितं न करिष्यति, धरित्र्याः सकल-धन-विनिमयेनापि न।

सत्यं ग्रयासियानो! अकाण्डे अङ्गुरीयकं ददानस्त्वं हृदयहीन-व्यवहारेण पत्न्या अन्तरे भृशं दुःखं दत्तवान्।

अहं पुनरीदृश्यामवस्थायां सत्यं विकृतमस्तिष्काऽभविष्यम्।

व्यासानिओ। (स्वगतम्) यद्यहं वामहस्त-कर्तन-समर्थोऽ-भविष्यं तन्मे वरणीयतममभविष्यत्। तदाहमवदिष्यं यदङ्गुरीयक-संरक्षणाय कृत्तो मम कर इति।

ग्रयासियानो। अये! व्यवहाराजीव-महोदयः व्यासानिओ-महोदय-सकाशेऽङ्गुरीयकं प्रार्थितवान् मम प्रभुस्तं प्रत्याख्यातुं नाभवत् समर्थः। ध्रुवमसौ तस्याङ्गुरीयकस्य उपयुक्ततमो ग्रहीता। अस्य व्यवहाराजीवस्योदाहरणम् अनुसृत्य तरुणस्तस्य करणिकोऽपि ममाङ्गुरीयकमयाचत। तेन च सुस्पष्टमुक्तं नान्यत् किञ्चित् तेन परिग्रहणीयमिति।

पोर्शिया। (व्यासानिओ उद्दिश्य) अये! कतरदङ्गुरीयकं भवता दत्तम् ? निश्चितं तन्न मत्प्रदत्तम्।

व्यासानिओ। ममाङ्गुलिदर्शनादेव ज्ञास्यसि किल यत् तदेवाङ्गुरीयकं मया दत्तम्।

पोर्शिया। यथाऽङ्गुल्यास्ते अङ्गुरीयकं भ्रष्टं तथा तव हृदयादपि साधुता दूरं गतेति सम्यग् अहं बुध्ये। भगवन्नाम्ना शपथं करोमि —यावत्पर्यन्तं तदङ्गुरीयकं नाहं स्वचक्षुभ्यां पश्येयम् तावत्पर्यन्तं नाहं कथञ्चन तव स्त्रीत्वं स्वीकरिष्यामि।

नेरिसा। तथाऽहमपि मम पत्युः।

व्यासानिओ। प्रियतमे पोर्शिये! यदि त्वमजानीथाः कस्मै मयाऽङ्गुरीयकं दत्तमिति, यदि तव सत्यधारणाऽजनिष्यत कस्माद्-भावनीयकारणात् तस्मै तद् दत्तम्—विशेषतो यतोऽसौ नान्यत् किञ्चिद् ग्रहीष्यतीति—तदैव केवलम् आत्यन्तिक कृतज्ञताहेतोरङ्गुरीयकं दत्तमिति—ततस्तवासन्तोषो ह्रसेत्।

पोर्शियो। यदि तस्याङ्गुरीयकस्य मूल्यं तव परिज्ञातमभविष्यत्, अथवा या भाग्यहीना नारी तुभ्यं तद् दत्तवती तस्याः स्वल्पमपि मूल्यं त्वया स्वीकृतमभविष्यत्—यद्वा, तस्याः संरक्षणेन तवात्म-सम्मानस्य सम्पर्कविषये तव यथार्थ-बोधोऽभविष्यत्—निश्चितं त्वं कदापि तन्न हस्तान्तरितमकरिष्य इति ध्रुवमेव।

यदि तस्याङ्गुरीयकस्य रक्षणविषये त्वं दृढप्रयत्नोऽभविष्यः न कोऽपि तादृशोऽधमूढस्तत्परिग्रहणाय बद्धपरिकरोऽभविष्यत्। नेरिसावदहमपि विश्वसिमि, ममाङ्गुरीयकं नार्यै दत्तमिति।

व्यासानिओ। देवि! ममात्मनाम्ना शपथं कुर्वे—न कस्याश्चन नार्या हस्ते तदङ्गुरीयकं गतम्। कश्चन संविधानविशेषज्ञः पण्डित-प्रवरस्तन्नीतवान्। ड्याकेट् त्रिसहस्राणि प्रत्याख्यायापि स तदङ्गुरीयकं परिगृहीतवान्। (पूर्वम्) अङ्गुरीयकं दातुम् अस्वीकुर्वति मयि

महाशयोऽसौ तद् विहायैव गतवान्, न मया बाधा दत्ता। मत्प्रिय-बन्धु-जीवनरक्षकं प्रति तादृश कठोर-व्यवहारमपि अङ्गुरीयकार्थं-महं कृतवान्।

प्रिये! तादृशो विपन्न मां कदाचन परिवेष्टितवती। ततो भृशं लज्जापन्नः केवलं गभीर-कृतज्ञताहेतोर्विशेषेण तदङ्गुरीयकं तस्मै दत्तवान्। आत्मगौरवं ममाकृतज्ञतया कलुषितं भवेदिति मह्यं नारोचत।

रजन्यालोवर्तिकारूप-पवित्र-नक्षत्रराजिनाम्ना शपथो मया पुनरपि क्रियते—यदि त्वं तस्मिन् क्षणे उपस्थिताऽभविष्यः, ध्रुवं त्वं स्वयं तस्मै महात्मने व्यवहाराजीवाय उपहारं दातुं मत्सकाशात्-तदङ्गुरीयकं अयाचिष्यथाः।

पोर्शिया। पश्य—तव व्यवहाराजीवस्य मद्गृहचतुष्पार्श्वेऽप्यागमनं कुरु सर्वथा निषिद्धम्, अन्यथा, मयि समादरहेतोर्यदङ्गुरीयकं सदा धारयितुं त्वं प्रतिज्ञाम् अकार्षीः तद् यस्मै व्यवहाराजीवाय दत्तवान्, त्वद्वद् वदान्यतामाश्रित्य अहमपि तस्मै मम यथासर्वस्वं समर्पयिष्यामि, इत्येतदपि सम्भवेत्।

नेरिसा। (ग्र्यासियानो उद्दिश्य) अहमपि तस्य व्यवहाराजीवस्य करणिकाय सर्वस्वं दास्ये इत्येवं सम्भावनायां न मामपि मम कर्त्रीं कुरुष्व।

एण्टोनिओ। अहो! अहमेवैतासाम् अप्रीतिमूलक-घटना-परम्पराणां कारणमस्मि!

पोर्शिया। नहि नहि, न भवता अन्यथो मन्तव्यम्। ध्रुवमितद् यद्वयं भवन्तमभिनन्दयामः।

व्यासानिओ। पोर्शिये! यदन्याय्यं मयाऽनुष्ठितम् तदर्थमहं भूयोऽपि क्षमां प्रार्थये। मम बन्धूनां समक्षम् मत्प्रतिफलनकारण-त्वत्सुन्दरचक्षुर्द्वयनाम्ना शपथं करोमि यत्—

पोर्शिया। शृणुन्तु सर्वे। एष ममोभयोश्चक्षुषोरात्मानं प्रतिविम्बितं पश्यति। एतेनैतदायाति यन्मम प्रतिनयनमेष आत्मानं दृष्ट्वा द्वयोर्नयनयोरस्य स्वरूपद्वयं पश्यतीति।

ततो ब्रवीमि—तवात्मस्वरूपस्य द्वित्वस्वीकरणात् परमपि किं त्वं विश्वसनीयोऽसि ?

व्यासानिओ। नहि नहि, देवि शृणु! सकृन्मां क्षमस्व। अतः परं नाहं कदाचन प्रतिज्ञाभङ्गं करिष्ये।

एण्टोनिओ। अस्य मङ्गलार्थम् अहमेकदा स्वदेहबन्धमकृणवम्। भवत्याः पतिर्यस्मै अङ्गुरीयकं दत्तवान् तस्य कृपां विना बहोः कालात् प्रागेव मम देहो लोपमयास्यत्। अद्य पुनरपि आत्मानं बन्धुं सुसज्जोऽस्मि। ममायं शपथो यद् भवत्योः पतिरितः परं न कदाचन प्रतिज्ञाभङ्गं करिष्यतीति।

पोर्शिया। तथा सति भवानस्य प्रतिभूर्भवतु। अङ्गुरीयकमेतदस्मै भवान् ददातु वदतु च—पूर्वाङ्गुरीयकाद्वर्तमानाङ्गुरीयकं समधिक-यत्नेन परिरक्षणीयमिति।

(अङ्गुरीयकं तस्मै ददाति)

एण्टोनिओ। व्यासानिओ! प्रतिज्ञा त्वयाऽवश्यमेव कार्या-यदेतदङ्गुरीयकं त्वमवश्यमेव यथाशक्ति यत्नपूर्वकं संरक्षिष्यसीति। (इत्यङ्गुरीयकं ददाति।)

व्यासानिओ। अहो भगवन्नाम्ना शपथः! यदङ्गुरीयकं व्यवहाराजीवाय दत्तं तदेवैतत्।

पोर्शिया। व्यासानिओ! मां क्षमस्व, एतदङ्गुरीयकं तेनैव मह्यमुपहारीकृतम्।

रसा। प्रियतम ग्रयासियानो! अहमपि क्षमां याचे। स तरुणः क्षीणकायो व्यवहाराजीव-करणिको मह्यमेतदङ्गुरीयकं ददौ।

पोर्शिया। भवतां सर्वेषां बुद्धिर्हतेति पश्यामि। गृह्यतामेतत् पत्रं

(पत्रं ददाति)—यथावसरं पठनीयम्। पदुयाधामतो बेलारिओ-महोदयः पत्रमेतल्लिखितवान्। अस्मात् सर्वथा परिज्ञातं भविष्यति यत् पोर्शियैव स व्यवहाराजीवः, नेरिसा च तस्य करणिक इति।

अत्रोपस्थितो लरेञ्जो-महोदयः साक्ष्यं दास्यति यत् पत्युर्मे गमन-समयादनन्तरमेव आवामपि अगच्छाव, साम्प्रतमेवावां प्रत्यागते न च गृहमपि प्रविष्टे।

एण्टोनिओ-महोदय! भवते स्वागतम्। भवतश्चिन्ता-वहिभूतं किमपि सत्यं मयोद्घाट्यते। पत्रमिदं पठतु भवान्।

अस्माद् भवता परिज्ञास्यते यद् भवतः समुद्रयानत्रयं वहुमूल्य-द्रव्याण्युद्वहत् अकस्मात् पोताश्रयं समागतम्। केनाद्भुत-सौभाग्य-फलेन पत्रमिदं मया समासादितं—नाहं तद् विज्ञापयिष्ये।

एण्टोनिओ। सर्वथाऽहं रुद्धवागस्मि।

ब्यासानिओ। अये! पोर्शिया मम स व्यवहाराजीवः, अथ च न मया परिज्ञाता?

ग्रयासियानो। नेरिसा-सुन्दरी च मम स करणिकः?

एण्टोनिओ। भद्रे! भवती मम जीवनं जीवनरक्षणोपायञ्च दत्तवती। यतः पत्रादस्मात् परिज्ञायते किल, यन्मम पोतश्रेणी पोताश्रयं समागतेति।

पोर्शिया। ततो लरेञ्जा! का ते वार्ता? मम करणिकस्त्वदर्थमपि शुभं संवादं कमप्यानीतवती।

नेरिसा। सत्यम् आनीतः सुसंवादः, पारिश्रमिकं विनापि तं संवादम् अस्मै दातुं सम्मतास्मि। तं गृहाण—

धनी यहूदिः मृत्यु-समये यां सम्पत्तिमुत्तराधिकारक्षमां त्यक्ष्यति तस्य मृत्योरनन्तरं तां समग्रां त्वं लरेञ्जो! तव पत्नी जेसिका च प्राप्स्यथः—एतन्मूलकं यहूदिवर स्वहस्त लिखितं दानपत्रम् अहं तुभ्यम् अर्पयामि।

लरेञ्जो। सुन्दर देवीयुगल! भवत्यौ अनाहारमृतप्रायजनेभ्यो-ऽमृतवर्षणं कुरुथः।

पोर्शिया। अहो नु-! दृश्यते किल यामिनी प्रभातप्राया! किन्तु मया सम्यग् बुध्यते किल—इतोमध्ये या घटनावली संघटिता तद्विषय-कौतूहलस्य भवतामवधिर्नास्तीति। ततश्चलत, वयं सर्वे गृहस्या-न्तर्गच्छामः। तत्र भवन्तः शपथग्रहणपूर्वकं तथ्यानि विज्ञापयितुम् अस्मान् पृच्छन्तु, निश्चितं वयं यथायथं प्रत्युत्तराणि दास्यामः।

ग्रासियानो। अथकिम्, तथा भवतु। किन्तु आमरणं नेरिसा-ङ्गुरीयक-रक्षणविषये यादृशं भयं माम् आकुलीकरिष्यति, नान्यत् किमपि तथेति ध्रुवम्।

एण्टोनिओ। भद्रे! अन्यत् किमपि प्रियं भवत्याः कर्तुं पारयामि?

पोर्शिया। अतः परमपि प्रियं किं वा स्यात्? तथापीत्थमस्तु—

(भरत-वाक्यम्)

भवतु मलिन-चेतः प्रेमपूतं पृथिव्या
व्यवदधतु च देशाद् दुःख-दैन्यादि-भावाः।
विगुण-विधिवशाद्वा कालतो वा करालात्
पतदपि विपदब्धौ मुच्यतां साधुवृन्दम्॥ १४॥

अपि च—

विरमतु रसना ते दोष-दृष्टेः परेषां
भजतु नियुतसंख्यामात्मदोषप्रचारे।
गुणबहुल-चरित्रं वैरिणो वा गुरोर्वा
भवतु सममुपास्यं मानवो ह्येष धर्मः॥१५॥

ॐ शान्तिः　ॐ शान्तिः　ॐ शान्तिः।



6. **Sahitya-Kana** Rs. 3·00
7. **Sanskritanka Roga.** Rs. 3·00

SANSKRIT DRAMAS OF Dr. ROMA CHAUDHURI

1. **Yatindra-Yatindram** (on the holy life of Dr. Jatindra Bimal Chaudhuri), Rs. 10·00
2. **Samkara-Samkaram** (on the holy, life of great Advaita Vedantist Sri Samkara.) Rs. 10·00
3, **Desa-Dipam** (on a nationalistic theme, on the holy life of a "Jawan", fighting for his Mother-Country.) Rs. 6·00
4. **Palli-Kamalam** (on a Village-lass) Rs. 10·00
5. **Nagara-Nupuram** (on a City Girl) Rs. 10·00
6. **Abhedanandam** (on the holy life of Swami Abhedanandam, on the occasion of his holy Birth-Centenary). Rs. 10·00
7. **Nivedita-Niveditam** (on the holy life of Sister Nivedita, on the occasion of her holy Birth-Centenary.) Rs. 10·00
8. **Bharatacaryam** (on the holy life of Dr. Sarvapalli Radhakrishnan, President of India) Ʊs. 10·00
9. **Rama-Carita-Manasam** (on the holy life of Saint Tulsidasa) Rs. 10·00

(The above Sanskrit Dramas have been staged all over India and outside many times. "Samkara-Samkaram" was staged in Kathmandu, Nepal, under the auspices of Indian Embassy, in the benign presence of His Majesty, King Mahendra of Nepal and other members of the Royal Family.

"Bharatacaryam" was staged in Rastrapati Bhavan, New Delhi, in the benign presence of the revered Rastrapati Dr. Radhakrishnan, who donated Rs. 1500, to Pracyavani as his blessings.)

10. **Tana-Tanu** (on the holy life of Sri Tanasena) Rs. 10·00
11 **Yuga-Jivanam** (on the holy life of Sri Ramakrisna) Rs. 10.00
12. **Bharata-Viram** (on the holy life Sri Sivaji) Rs. 10·00

— -